M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref. / Ser. 503

Title: Kiratarjuniam

503

किरातार्जुनीयम्

Incomplete

Kirātārjuniyam	:	Title
Bhāravi.	:	Author
	:	Editor
	:	Year, Vols.
	:	Publisher
503	Begins & Ends abruptly.	: Remarks

संगेसभायां।समितिरित्यमरः २

उपकंठानिकाभंर्णं २

सजातीयेकुलंयूथं २

तरुयूथपंक्तयः॥असक्रमस्थांसिपयःक्षरंत्यमूरुपायनानीवनयंतिधेनवः॥३१॥जगत्प्रसू
तिर्जगदेकपावनीव्रजोपकंठंतनयैरुपेयुषी॥ द्युतिंसमग्रांसमितिर्गवामसावुपैतिमंत्रैरि
वसंहिताहुतिः॥३२॥कृतावधानंजितबर्हिणध्वनौसुरक्तगोपीजनगीतनिःस्वने॥इदंजि
घत्सामपहायभूयसींनसस्यमभ्येतिमृगीकदंबकं॥३३॥असावनास्थापरयावधीरि
तःसरोरुहिण्याशिरसानमन्नपि॥उपैतिशुष्यन्कलमःसहांभसामनोभुवातप्त
इवाभिपांडुतां॥३४॥अमीसमुद्धूतसरोजरेणुनाहृताहृतासारकरेणवायुना॥उ
पागमेदुश्चरिताइवापदांगतिंनानि[illegible]मलंशिलीमुखाः॥३५॥मुखैरसौ

(interlinear glosses: संगता; मोजिता; हरिण्यः; समूहाय:; अनादरपरया; शालिविशेषः)

विद्रुमभंगलोहितैः [illegible] तीशुकावली व्यक्तशिरीषकोमला

धनुःश्रियंगोत्रभिदोनुगछति ॥३६॥ [illegible] कथयतीनतनातिदूरादथदहशोपहितो

छबिरश्मिबिंबः ॥ विगलितजलभारशुक्लभासां निचयइत्वांबुमुचांनगाधिराजः

॥३७॥ तमतनुवनराजिश्यामितोपत्यकांतंनगमुपरिहिमानीगौरमासाद्यजि ॥१५॥

ष्णुः ॥ अपगतमदरागस्यानुसस्मारलक्ष्मीमसितमधरवासोबिभ्रतःसीरपाणेः

॥३८॥ इतिश्रीकिरातार्जुनीयेमहाकाव्येलक्ष्मांभारविकविकृतौशरद्वर्णनंनाम

चतुर्थःसर्गः ॥४॥ ॥ छ ॥

पश्चात्सादृश्ययोरनु ३

रलोस्याङ्गहर्षयोः १

अथजयायनुमेरुमहीभृतोरभसयानुदिगंतदिदृक्षया ॥ अभिययौसहिमाचलमुछ्रितंस

मुदितंनुविलंघयितुंनभः ॥१॥ तपनमंडलदीपितमेकतः सततनैशतमोवृतमन्यतः ॥ ह

सितभिन्नतमिस्रचयंपुरःशिवमिवानुगतंगजचर्मणा ॥२॥ क्षितिनभःसु

रलोकनिवासिभिःकृतनिकेतमदृष्टपरस्परैः ॥ प्रथयितुंविभुतामभिनिर्मितंप्रति

शंभुस्त्र्यंबकः [illegible] | निधिंजगतामिवशंभुना ॥३॥ भुजगराजसितेननभःश्रिताकनकराजिविराजि

बालितिशांभुः ३ | तसानुना ॥ समुदितंनिचयेनतडित्वतींलघयताशरदंबुदसंहतिं ॥४॥ मणिम

युखचयांशुकभासुराःसुरवधूपरिभुक्तलतागृहाः ॥ दधतमुच्चशिलांत

२ पाविपुर [illegible] रतावसंधि [illegible] विततसी [illegible] नसा [illegible]

रंगाः सुराः पुरइवोदितपुष्पवना भुवः ॥ ... ती शुभ्रशिविपांडुभिर्विरहितैरचि

संजातपक्षमिव रद्युतितेजसा ॥ ७ ॥ उदितपक्षमिवारतनिस्वनैः पृथुनितंबविलंबिभिरंबुदैः ॥ ८ ॥ दधतमा

करिभिः करिभिः क्षतैः समवतारसमैरसमैस्तटैः ॥ विविधकामहिता महिताम्भसः

वेगवंतः स्फुटसरोजवना जवना नदीः ॥ ९ ॥ रहितरत्नचयान्न शिलोच्चयानपलताभव ॥ २० ॥

नानदरीभुवः ॥ विपुलिनाम्बुरुहा न सरिद्वधूरकुसुमान्दधतं न महीरुहः ॥ १० ॥ व्य

थितसिंधुमनीरशनैः शनैरमरलोकवधूजघनैर्घनैः ॥ फणभृतामभितो विततं तत

तं दयितरम्यलताबकुलैः कुलैः ॥ ११ ॥ नवविनिद्रजपाकुसुमत्विषां द्युतिमतां निकरे

समूहेन

कदंबमाकुः सिद्धार्थनीपच निकुरंबके २

पद्मरागाणां निक्षिप्ताः संघट्टिताः वप्रेषु

ण महारजनं ॥ निहितसांध्यमयूखमिव क्वचिन्निचितकांचनभित्तिषु सानुषु ॥ १२ ॥

पृथुकदंबकदंबकराजितं ग्रथितमालतमालवनाकुलं ॥ लघुतुषारतुषारजलश्च्युतं

धृतसदानसदाननदंतिनं ॥ १३ ॥ ससुखवापमनेकमणिप्रभैरपपयोविशदैर्हिमपा

डुभिः ॥ अविचलैः शिखरैरुपबिभ्रतं ध्वनितसूचितमंबुमुचां चयं ॥ विकचवारिरुहं दध

तं सरः सकलहंसगणं शुचिमानसं ॥ शिवमगात्मजया च कृतेर्ष्यया सकलहंसगणं शु

चिमानसं ॥ १५ ॥ ग्रहविम रागोशिरा ॥ भितो दिवं ज्वलयतौषधिजेन कृशानुना ॥ मुहुरनु

स्मरयंतमनुक्षपं त्रिपुरमेत्सुरतविरोधिनः ॥ १६ ॥ विततसीकरराशिभिरुच्छ्रितैरुप

लरोधविवर्तिनिरंबुनि. [illegible] जनां धृतसितव्यजनामिव जाह्नवीं
॥१५॥ पंचभिः कुलकं ॥ [illegible] नाधिपतेरथो नगविलोकनविस्मितमानसः ॥
स जगदेकवनं प्रियमादरान्मुरवरातावसरेहि विसर्जते ॥१६॥ अलमेष विलोकि
तःप्रजानां सहसा संहृतिमंहसां विहंतुं ॥ घनवर्त्मसहस्रधेव कुर्वन्हिमगौरैरच ॥२॥
पुरा[illegible]
लाधिपः शिरोभिः ॥१७॥ इह दुराधिगमैः किंचिदेवागमैः सततमसुतरं वर्णयंत्य
तरं ॥ अमुमतिविपिनं वेद दिग्व्याप्तिनं पुरुषमिव परं पद्मयोनिः परं ॥१८॥ रुचिर
सुरत[illegible]
पल्लवपुष्पलतागृहैरुपलसज्जलजैर्जलराशिभिः ॥ नयनैसंततमुत्सुकता

अथ: शुभावहो विधि
भाग्यवंता   महापथ[illegible]
मयं ध्वनिमतीरूपकांतमपि स्त्रियः ॥१९॥ सुकृतैः सदा नयवता यवता निधिगुह्यकाधि
गिरिणा पूर्णीकृता [illegible]
परैः परमैः ॥ अमुना धनैः क्षितिभृता निभृता समतीत्य भाति जगती जगती ॥२०॥
अखिलमिदममुष्य गौरीगुरोस्त्रिभुवनमपि नैति मन्ये तुलां ॥ अधिवसति सदा
(आस्थन्) यदेनं जनैरविदितविभवो भवानीपतिः ॥२१॥ वीतजन्मजरसः परं शुचि ब्रह्मणः पद
मुपैतुमिच्छतां ॥ आगमादिव तमोपहादितः संभवंति मतयो भवच्छिदः ॥२२॥ दिव्य
[illegible]
स्त्रीणां सचरणलाक्षारागा रागायाते निपतितपुष्पापीडाः ॥ पीडाभाजः कुसुमचि
ताः साशंसं शंसंत्यस्मिन्सुरतविशेषं शय्याः ॥२३॥ गुणसंपदा समधिगम्य परं
सत्र[illegible]   [illegible]

जगाद्रेः पीअथ ... संप्राप्ति ... मारत ज्वलता सपः ... लणज्वालेप

हमानमचमहितेजगतां ॥ नेयं स ... पड्ग्वाधिपातोविरमंतिनज्वलितुमोष
धयः ॥ १४ ॥ कुररीगणः कृतरवस्तरवः कुसुमानताः सकमलं कमलं ॥ इह सिंधव
सूळसोरी रमेरियां च ज्ववणावरणाकरिणांमुदेसनलदानलदाः ॥ १५ ॥ साद्रयंगतमपनिद्रचूतगंधे २२
रामोदं मदजळसेकजंदधानः ॥ एतस्मिन्मदयतिकोकिलानकाले लीनालिः सु
रकरिणांकपोळकाषः ॥ १६ ॥ सनाकवनितंनितंबरुचिरं चिरंसुनिनदैर्नदैर्वृत
ममुं ॥ मताफणवतोवतोरसपरापरास्तवसुधासुधाधिवसती ॥ १७ ॥ श्रीमहृ
ताभवनमौषधयः प्रदीपाः ॥ शय्यानावानिहरिचंदनपल्लवानि ॥ अस्मिन्रति
ओषध्योजातिमात्रेस्पुरज्जातोस्वर्वमाषधं ... हरिचंदनमातंगो

अमगुदाच्चसरोजवाताः स्मर्तुं दिशंतिनदिवः सुरसुंदरीभ्यः ॥ १८ ॥ ईशार्थमंभसिचिरायतप
ज्वरंतायादोविलंघनविलोळविलोचनायाः ॥ आलंबताग्रकरमत्रभवोभवान्याश्च्यो
तन्निदाघसलिलांगुलिनाकरेण ॥ १९ ॥ येनापविद्धसलिलस्फुटनागसद्मा देवासु
रैरमृतमंबुनिधिर्ममंथे ॥ व्यावर्तनैरहिपतेरयमाहितांकः खंव्यालिखन्निवविभाति
समंदराद्रिः ॥ २० ॥ नीतोच्छ्रायं मुहुरशिशिररश्मेरुस्रैरानीलाभैर्विरचितपरभागारत्नैः ॥ ज्योत्स्नाशं २१ चंद्रिकाकौमुदी
चित्रादश्यमपांडुराः शंकामिह वितरति हंसश्येणीमध्येप्यत्रस्फटिकरजतभित्तिच्छाया ॥ २१ ॥ दधतइवविला हसंतीव
सशालिनः संभ्रदुपततापवनेनकंपितोसुनइह ललितविलासिनीजनभ्रूगतिकुटिलेषु इषत्तरंगि
पयःसुपंकजानि ॥ २२ ॥ अस्मिन्नगृह्यतपिनाकभृतासलीलमाबद्धवेपथुरधीरवि तेषु
संजातकंपः

लोचनाया॥ विन्यस्तमंगलमहौषधिरीश्वराया स्रस्तोरगप्रतिसरेण करेण पाणिः
॥२३॥ कामर्द्धिघनपदवीमनेकसंख्यैस्तेजोभिः शुचिमणिजन्मभिर्विभिन्नं ॥२४॥ उस्रा
णां व्यभिचरतीव सप्तसप्तेः पर्यस्यन्निह निचयः सहस्रसंख्यां ॥२५॥ व्यधत्त यस्मि
अलकापुरी न्पुरमुच्चगोपुरं पुरां विजेतुर्धृतये धनाधिपः ॥ स एष कैलास उपांतसर्पिणः २३
२३ करोत्यकालास्तमयं विवस्वतः ॥२६॥ नानारत्नज्योतिषां संन्निपातैश्छन्ने यात्रेषु
ष्वंतः सानुवप्रांतरेषु ॥ बद्धांबद्धांभित्तिशंकाममुष्मिन्नावानावान्मातरिश्वा निहंति वायुः
॥२७॥ रम्या नवद्युतिरपैति न शाद्वलेभ्यः श्यामीभवंत्यनुदिनं नलिनीवनानि ॥ अस्मिन्वि

हरितत्वमप्रदेशेभ्यः

चित्रकुसुमस्तबकाञ्चितानां शाखाभृतां परिणमंति न पल्लवानि ॥२८॥ परिस्फुरद्विष
येषु लीढमुक्ताः प्रथमलूनोद्गमशंकया मृगीभिः ॥ इह नवशुककोमला मणीनां रवि
करसंवलिताः फलंति भासः ॥२९॥ उत्फुल्लस्थलनलिनीवनादमुष्मादुद्धूतः सर
सिजसंभवः परागः ॥ वात्याभिर्वियति विवर्तितः समंतादाधत्ते कनकमयातपत्रल
क्ष्मीं ॥३०॥ इह सनियमयोः सुरापगायामुषसि सयावकसव्यपादरेखा ॥ कथ
यति शिवयोः शरीरयोगं विषमपदा पदवी विवर्तनेषु ॥३१॥ संमूर्छतां रजतभित्तिमयू
खजालैरालोकपादपलतांतरनिर्गतानां ॥ घर्मद्युतेरिह मुहुः पटलानि धाम्नां

२ उक्षाले डेवलीव दंतुषभेवप भोक्यपइ समर
शुक्लशुभ्रशुचिश्वेतविशदश्येतपांडुराः
पुनःपुनस्फुरंति

मादर्शमंडलनिभानिसमुल्लसंति ॥४०॥ रुरुचे मयूखनिचयैः परिवीतमर्त्तिप्राभिधानपरि
मंडितानिगेहं ॥ श्यामाण्यमुष्य भजते गणभर्तुरुक्षा कुर्वंश्च धूर्जनमनःस्वसुरा शोककरां
१२४ कां ॥४१॥ संप्रतिलब्धजन्मशनकैः कथमपि [illegible] मेदाच्छ २५॥
धरपटले ॥ खंडितविग्रहं बलभिदो धनुरिह विविधाः प्रस्तुयितुं भवंति विशरवः
शिखरमणिरुचः ॥४३॥ स्नपितनवलतातरुप्रवालैरमृतलवस्रुतिशालिभिर्मयू
खैः ॥ सततमसितयामिनीषु शंभुरमलयतीहवनांतमिंदुलेखा ॥४४॥ क्षिपतियोनुव
नं वितततां बृहद्बृहतीकामिवरौचनिकीं रुचं ॥ अयमनेकहिरण्मयकंदरस्त

स्वच्छपरिकां पा० र्थी पाटांतरं च वलयति १
गोरोचनेन

भानुः करो मरीचिस्त्री पुंसयोः ५
गुणस्त्वावृत्तिशब्दादिज्येंद्रियामुख्यतंतुषु इत्ययं जयंति ५

परस्परसंयोगं

वपिलुर्दर्पितो जगतीधरः ॥४५॥ सकिंजवादपनयत्यनिलिलतानां वैरोचनैर्द्विगुणितोः अनुकुर्वंति
सहसामयूखैः ॥ रोधो भुवां मुहुरमुत्र हिरण्मयीनां भासस्तडिद्विलसितानि विडंबयं
ति ॥४६॥ कुवणकंपनिरस्तमहाहिभिः क्षणविमत्तमतंगजवर्जितैः ॥ इमदस्नपिते रवे...कैः
मेघपंक्तिसादे इंद्रनीलानां विवर्धितसंघातः
रनुमीयतेसुरगजस्य गतं हरिचंदनैः ॥४७॥ उज्जलदश्मंडलधूनैरसिताश्मनां नपहतप्रच
अप्रकाशितागमरा यामिनी नप
येहमरीचिविशिखैः ॥ भवति दीप्तिरदीपितकंदरा तिमिरसंवलितेव विवस्वतः ॥४८॥ ...स्यो
व्यासस्य रहितशराखा तपस्वर अप्रमत्तः पिहितंपिन
मेवन्नपि मुनेरिह ह्व्यासनेन क्षारोपितः पथितपस्यहतप्रमादः ॥ प्रीयेण सत्यपिहितार्थ
अभ्रक्यानि
करविधाहि श्रेयांसि लब्धुमसुकरवाणि विनांतरायैः ॥४९॥ मा भूवन्नपथहृतस्तवं

प्रायोवयसि बाहुल्ये २

डियाख्याः संतापदिग्राहुतोशवः शिवांप्र॰ ॥ रक्षांतस्तपसि बलं च लोकपालाः कल्या

णीमखिकरूणांक्रियाक्रियास्तुः ॥५०॥ इत्युक्त्वा सपदि हितं प्रियं प्रियार्हे धाम स्वंग

तवतिराजराजभृत्ये ॥ सोत्कंठं किमपि पृथासुतः प्रदध्यौ संधत्ते भृशमरतिं हि स

द्वियोगः ॥ ॥५१॥ तमनतिशयनीयं सर्वतः सारयोगाद्दविरहितमनेकेनांकभाजा फले

न ॥ अकृशमकृशलक्ष्मीश्चेतसाशंसितं स स्वमिव पुरुषकारं शैलमभ्याससाद ॥

॥ ॥५२॥ ॥ ७ ॥ ॥ इति श्री किरातार्जुनीये महाकाव्ये लक्ष्म्यंके भारविकविकृतौ

इंद्रकिलाभ्यागमनो नाम पंचमः सर्गः ॥ ७ ॥ ॥ ॥ ॥ ७ ॥

रुचिराकृतिं कनकसानुमथो परमः पुमानिव पतिं पततां ॥ धृततत्पथस्त्रिपथगामभि

सौम्यविग्रहः गुणाः सामुद्रिकाः ॥ कनकविकाराः सानवो यस्य ॰ समीपो भयतः शीघ्र ॰ अभिमुखं गतः इत्यमरः ॰

पौरुष्यः इति शे ४

ह्रारिनालंबभूव स्तिमितममरनद्युई्दुमक्ष्णां सहस्रं ४७ इति श्री किरातार्जुनीये

महाकाव्ये लक्ष्म्यंके भारविकविकृतौ सुरांगनाप्रस्थानो नाम षष्ठः सर्गः ॥ ६ ॥

॥ ॥ श्रीमद्भिः सरथगजैः सुरांगनानां गुप्तानामथ सचिवैस्त्रिलोकभर्तुः सम्म

र्छन्नलघुविमानरंध्रभिन्नैः प्रस्थानं समभिदधे मृदंगनादैः ॥ १ ॥ सोत्कंठैरम

रगणैरनुप्रकीर्णान्निर्याय ज्वलिततनुच्छः पुरान्मघोनः ॥ रामाणामुपरिविव

स्वतः स्थितानां नासेदे चरितगुणत्वमातपत्रैः ॥ २ ॥ धूतानामभिमुखपातिभिः स

मीरैरायासादविशदलोचनोत्पलानां ॥ आनिन्येमदविहितां श्रियं वधूना

जनितरामाचोद्भेदः ३ कथमपि दितधापुकं पतन्गौरववादृष्टिस्सिकः

चक्रधाराप्रधिनेमिरिति पादकः २

मुग्धं अयति जनितः कपोलरागः ३ श्रीमद्भिः कथमपि देवतानुभावादाकृष्टे
ःध्रुवविभिरायतं तुरंगैः नेमीनाम सति विवर्त्तने रथौघैरासेदे बयाति विमानव
स्ववर्त्तिः ४ कांतानां कृतपुलकः स्तनांगरागे वक्त्रेषु च्युततिलकेषु मौक्तिका
भः संपेदे श्रमसलिलोद्गमो विभूषां रम्याणां विकृतिरपि श्रियं तनोति ५ रा
जद्भिः पथि मरुतामभिन्नरूपैरुल्कार्चिः स्फुटगतिभिर्ध्वजांशुकानां तेजो
भिः कनकनिकाषराजिगौरैरायामः क्रियत इवास्मसातिरेकः ६ रामाणामव
जितमाल्यसौकुमार्ये संप्राप्ते वपुषि सहत्वमातपस्य गंधर्वैरधिगतविस्म

अतिक्रमितं

३१

करालकदाम्भोमेदाश्च नेत्रास्यांचमदस्रुतिः कक्ष्याप्रकोष्ठाहर्म्यादिकांचीमध्येभवन्धने

ये: प्रतीये कल्याणी विधिषु विचित्रता विधातुः ७ सिंदूरैः कृतरुचयः सहेमकक्ष्याः स्रोतो
भिस्त्रिदशगजा मदं क्षरंतः साद्दश्यं ययुररुणांशुरागभिन्नैर्वर्षद्भिः स्फुरितशतह्रदैः प
योदैः ८ अत्यर्थं दुरुपसदादुपेत्य दूरं पर्यंतादहिममयूखमंडलस्य आशानामु
परचितामिवैकवेणीं रम्योर्मिं त्रिदशनदीं ययुर्बलानि ९ आमत्तभ्रमरकुलाकुला
नि धुन्वन्नुद्धूतग्रथितरजांसि पंकजानि कांतानां गगननदीतरंगशीतः संतापं
विरमयति स्म मातरिश्वा १० संभिन्नैरिभतुरगावगाहनेन प्राप्योर्वीरनुपदवीं
विमानपंक्तीः तत्पूर्वं प्रतिविदधे सुरापगायाः प्रांतस्खलितविवर्त्तनं पयोभिः ११

किनारिपाठांतरं चक्रे संक्षुभितेः २ विपुला २

वप्रःपिनारिनाम्नश्री सुरे राध सिस्तानु निरवे जयंती २

पुतकं गुंभसयुगेयोवाने वहुने पिवेलि विचः = ५
अन्तरीये पसंब्यानपरिधानादयोंशुक मित्यमरः ५

कानानाम्र रुचारितात्पयोव्यथानामक्षाग्रसक्तसुनवैरमवेदिकानां ॥ निःसंगंप्रधिभिरुपादेदे
विहृत्तिः संपीडक्षुभितजलेषुतोयदेषु ॥ ३ ॥ तस्मानामुपदधिरे विषाणभिन्नाः प्रह्लादं सुरभि
सुरकरिणां घनाः क्षरंतः ॥ युक्तानां खलु महतां परोपकारे कल्याणी भवति रुजत्स्वपिप्रवृ
त्तिः ॥ १४ ॥ संवातामुहुरनिलननीयमानेदिव्यस्त्रीजघनवरांशुके विवृत्तिं ॥ पर्यस्यत्पृथुम
णिमेखलांशुजालं संजज्ञेयुतकमिवांतरीयमूर्व्याः ॥ १४ ॥ अप्याद्रिकृततिलकास्तुषा
रपातैः प्रल्हादं शमितपरिश्रमादिशंतः ॥ कांतानां बहुमतिमाययुः पयोदा नाल्पी
यान्बहुसुहृतं हिनस्ति दोषः ॥ १५ ॥ पातस्य पथिततरंगसेकतानां विच्छेदे विपमसि
वारिवाहजाले ॥ प्रांतेषु स्थिरशावधूजनांगनाजां संधानं सुरधनुषा प्रभामणीनां ॥ १६ ॥
संसिद्धा विविक्तिकरिणीयसन्निबद्धे रालोपैः पिपतिषतां विलंघ्यवीथिं ॥ आसेदर्दश
शतलोचनध्वजिन्याजीमूतैरपिहितसानुरिंद्रकीलः ॥ १७ ॥ आकीर्णामुख
नलिनैर्विलासिनामुद्धृतस्फुटविशदातपत्रफेना ॥ सा तूर्यध्वनितगभीरमा
पतंतीभूनसुः शिरसि नभोनदीव रेजे ॥ १८ ॥ सेतुं बंदधतिपयोमुचां वितान
संरंभादभिपतितो रथान्जवेन ॥ आनिन्युर्नियमितरश्मिभुग्नघोणाः कृ
च्छ्रेणक्षितिमवनामिनस्तुरंगाः ॥ १९ ॥ माहेंद्रं नगमभितः करेणुवर्याः पर्यंतस्थि
तजलदा दिवः पतंतः सादृश्यं नि

अवनमदर्वकापः

किरणग्रग्रहोरश्मी घोणातुप्रोथमस्त्रियामित्यमरः = २
प्रोथमस्त्रीतुरंगास्ये २

लयनतिः प्रकंपपक्षैरा जग्मुर्जलनिधिमिवापगा गजेंद्रैः ॥२०॥ उत्संगे समविषमे
समं महाद्रेः क्रांतानां वियदभिपातलाघवेन आमूलादुपनदि सैकतेषु ले
भे सामग्र्यं खुरपदवी तुरंगमाणां ॥२१॥ सा ध्वानं निपतितनिर्झरासु मंद्रैः संमू
र्छन्प्रतिनिनदैरधित्यकासु ॥ उद्ग्रीवैर्घनरवशंकया मयूरैः सोत्कंठं ध्वनिरुप
शुश्रुवे रथानां ॥२२॥ संभिन्नामविरलपातिभिर्मयूखैर्नीलानां भृशमुपमेखलं
मणीनां ॥ विच्छिन्नामिव वनिता नभोंतरालैर्वप्रांतःस्रुतिमवलोकयांबभूवुः ॥२३॥
आसन्नद्विपपदवीमदानिलाय क्रुध्यंतो धियमवमत्य धूर्गतानां ॥ आधोरणानां

सव्याजं निजकरिणीभिरात्तचित्ताः प्रस्थानं सुरकरिणः कथंचिदीषुः ॥२४॥ नीरंध्रं पथिषु
रजो रथांगनुन्नं पर्यस्यन्नवसलिलारुणं वहंती ॥ आतेने वनगहनानि वाहिनी सा घ
र्मार्तक्षुभितजलेव जह्नुकन्या ॥२५॥ संभोगक्षमगहनामथोपगंगं बिभ्राणां ज्वलि
तमणीनि सैकतानि ॥ अध्यूषुस्ततकुसुमाचितां सहाया वृत्रारेरविरलशा
द्वलां धरित्रीं ॥२६॥ भूभर्तुः समधिकमाददे तदोर्व्याः श्रीमत्तां हरिसखवाहिनी
निवेशैः ॥ संसक्तौ किमसुलभं महोदयानामुच्छ्रायं नयति यदृच्छयापि योगः ॥२७॥
सामोदाः कुसुमतरुश्रियो विविक्ताः संपत्तिः किसलयशालिनी लतानां ॥ साफल्यं
प्रपुरमरांगनोपभुक्ताः सा लक्ष्मीरुपकुरुते यया परेषां ॥२८॥ क्रांतापि चिद

कुथस्याकारिकं कक्ष्येत्यमरः २ प्रवेण्यास्तरणं वर्णः परिस्तोमः कुथो द्वयोरित्यमरः २

रावधूजनः पुरस्ताद्धीना हि व्यसितविलोलपल्लवानां ॥ सख्यानां हतविनयैरिवा
ऽवधूजनः पुरस्ताद्धीनाहिव्यसितविलोलपल्लवानां ... उत्सृष्टधूर्जकुंथकंकटाधरित्रीमा
वतानां संपर्कं परिहरति स्म चंदनानां ॥ २९ ॥ उत्सृष्टध्वजकुथकंकटा धरित्रीमा
नीतां विदितनयैः श्रमं विनेतुं ॥ आक्षिप्तद्रुमगहनां युगांतवातैः पर्यस्तां गिरय इवाद्रि
पाविरेजुः ॥ ३० ॥ प्रस्थानश्रमजनितां विहाय निद्रामामुक्ते गजपतिना सदानपंके
शय्यांते कुलमलिनां क्षणं विलीनं संरंभच्युतमिव शृंखलं चकासे ॥ ३१ ॥ आयस्तः
सुरसरिदोघरुद्धवर्त्मा संप्राप्तुं वनगजदानगंधिरोधः ॥ मूर्धानं निहितशिताङ्कुशं
विधुन्वन्यंतारं नविगणयां चकार नागः ॥ ३२ ॥ आरोढुः समवनतस्य पीतशेषे साः
त्रो कंपयसि समीरितं करेण ॥ संमार्जन्नरुणमदस्रुतीकपोलौ सुस्पंदं मदइ
वशीकरः करेणोः ॥ ३३ ॥ ३४

मंजेरआदौ संक्रमविनाविच्छिर्विकृत्यः

करेणुरिभ्यां स्त्री नेभः अमरः

आघ्रायक्षणमतितृष्यतानिरोषादुत्तीरं निहितविषृत्तलोचनेन ॥ संघट्टं वनकरिणां
मदांबुसेकैः नीचैर्मेहिममपि वारिवारणेन ॥ ३४ ॥ प्रख्यातं नमदसुरभीणि निम्नगायाः क्रीडं
तो गजपतयः पयांसि कृत्वा ॥ किंजल्कव्यवहितताम्रदानलेखैरुत्तेरुः सरसिजगंधिभि
र्विकपोलैः ॥ ३५ ॥ आकीर्णं बलरजसा घनारुणेन प्रक्षोभैः सपदि तरंगितं तटेषु मातं
गोन्मथितसरोजरेणुपिंगं माञ्जिष्ठं वसनमिवांबु निर्बभासे ॥ ३६ ॥ श्रीमद्भिर्नियमित
कंधरापरांतैः संसक्तैः रगुरुवनेषु साङ्गहारं ॥ संप्रापे विसृतमदांबुभिर्गजेंद्रैः प्रस्यं
दिप्रचलितगंडशैलशोभा ॥ ३७ ॥ निःशेषं प्रशमितरेणु वारणानां स्रोतोभिर्मदजलं
मुस्ज्जतामजस्रं ॥ आमोदं व्यवहितभूरिपुष्पगंधो भिन्नैकोऽसु ... वाहगंधवाहः ॥ ३८ ॥

गध्करंगंजेषोलोस्क्त्युनाल्कुषोपलानि गिरिरिति अमरः २

रेणुर्नाद्वयोरजे २

पुष्पजातिः ... एतानी पुष्पाणि ...

परिकरः वसनाभरणादि २

सादृश्यं दधति गभीरमेघघोषैरुन्निद्रक्षुभितमृगाधिपश्रुतानि । आतेनुश्चकितच
कोरनीलकंठान्कक्षांतानमरमहेभबृंहितानि ३९ शाखावसक्तकमनीयपरिछदा
नामध्वश्रमातुरवधूजनसेवितानां । जज्ञे निवेशनपरिक्षतानां लक्ष्मीः पुरोपव
नजा वनपादपानां ४० ॥ इति श्रीकिरातार्जुनीये महाकाव्ये लक्ष्म्यंके भारविकविकृतौ ३७
सुरसेनानिवेशो नाम सप्तमः सर्गः ॥ ७ ॥ छ ॥ अथ स्वमायाकृतमंदिरो
ज्वलं ज्वलन्मणि व्योमसदां सनातनं । सुरांगना गोपतिचापगोपुरं पुरं वनानां
विजिहीर्षया जहुः ॥ १ यथायथं ताः सहिता नभश्चरैः प्रभाभिरुद्भासितशैलवीरुधः

गंधसारो मलयजो भद्रश्रीश्चंदनोऽस्त्रियामित्यमरः १

३ नाम गोत्रं कुलं गोत्रमित्यमरः ३

कुःसुरराजयोषितां ॥ कपोलकाषैः करिणां मदारुणैरुपाहितश्यामरुचश्च चंदनाः ॥ १२ ॥ कालापकं स्वर्गो
वेस्वसितापि चित्तहारिणा विलोभ्यमाना प्रसवेन शाखिनां ॥ नजस्वराणामुपकर्णमिक्षतां प्रियाणि चक्रुः
प्रणयेन योषितः ॥ १३ ॥ प्रयच्छतोच्चैः कुसुमानि मानिनी विपक्षगोत्रं दयितेन लंभिता ॥ न किंचिदूचे च
रणेन केवलं लिलेख बाष्पाकुललोचना भुवं ॥ १४ ॥ प्रियेपरार्यैछलितावचमुन्मुखी निबद्धदृष्टिः शि
थिलाकुलोच्चया ॥ समादधे नांशुकमाहितं वृथा विवेद पुष्पेषु न पाणिपल्लवं ॥ १५ ॥ सलीलमास
क्तलतांतभूषणं समासजंत्या कुसुमावतंसकं ॥ स्तनोपपीडं नुनुदे नितंबिना घनेन कश्चिज्ज
घनेन कांतया ॥ १६ ॥ कलत्रभारेण विलोलनीविना गलद्दुकूलस्तनशालिनोरसा ॥ बलिव्यपा

परागं पद्मकुंकुमाधिनामित्यर्थः २ अंबरीपापमस्थानपरीधानादर्शांशुकं ३

कुथस्याकरिकंबळ इत्यमरः २ ... इत्यमरः १२
२ जळधायमन पंक्त्यास्तुसिक हस्तधा ... इत्यमरः १२

स्फुटरोमराजिना निरायतत्वादुदरेण ताम्यता ॥१७॥ विलंबमानाकुलकेशपाशया कयाचिदावि
ष्कृतबाहुमूलया ॥ तरुप्रसूनान्यपदिश्य सादरं मनोधिनाथस्य मनः समाददे ॥१८॥ युग्मं ॥
व्यपोहितुं लोचनतो मुखानिलैरपारयंतं किल पुष्पजं रजः ॥ पयोधरेणोरसि काचिदुन्मदाः
प्रियं जघानोन्नतपीवरस्तनी ॥ इमान्यमूनीत्यपवर्जिते शनैर्यथाभिरामं कुसुमाग्रपल्लवे ॥ वि
हायनिःसारतयैव भूरुहान्पदं वनश्रीर्वनितासु संदधे ॥२०॥ प्रवालकं नंगानुषापाणिपल्लवः प
रागपांडूकृतपीवरस्तनः ॥ महीरुहः पुष्पसुगंधिराददे वपुर्गुणोच्छ्रायमिवांगनाजनः ॥२१॥ वरो
रुभिर्वारणहस्तपीवरैश्चिराय खिन्नान्नवपल्लवश्रियः ॥ समेपिया तुं चरणाननीश्वरा मदा
दिव प्रस्खलतः पदे पदे ॥२२॥ विसारिकांचीमणिरश्मिलब्धया मनोहरोच्छ्रायनितंबशो

कोमळानइत्यर्थः २ तज्जनितोच्छ्रायः उच्छ्रितं

नतसाज ३

भोन्मथं नानखव्रणास्तिरोहिता विभ्रममंडनेन ये ॥ हृतस्य शोभा निचकुंकुमस्य ता नुविकत्थनीयान्
दधुरन्यथा श्रियः ॥२४॥ प्रियेण सेयप्रथा विपक्षसंनिधावुपाहितां वक्षसि पीवरस्तने ॥ स्रजं न का
चिद्विजहौ जलाविलां वसंति हि प्रेम्णि गुणा न वस्तुनि ॥२५॥ असंशयं न्यस्तमुपांतरक्त
तां यदेव रोद्धुं रमणी निरंजनं ॥ हृतेपि तस्मिन्सलिलेन शुक्लतां निरासरागो नयनेषु नाश्रि
ये ॥२६॥ द्युतिं वहंतो वनिताबतंसका हृताः प्रलोभादिव वेगिभिर्जलैः ॥ उपप्लुतास्तत्क्षणशो
चनीयतां च्युताधिकाराः सचिवा इवाययुः ॥२७॥ विपत्रलेखा निरलक्तकाधरा हृतांजना स्त्रीरपि
बिभ्रती श्रियं ॥ निरीक्ष्य रामा बुबुधे नभश्चरैरलंकृतं तद्वपुषैव मंडनं ॥२८॥ तथा न पूर्वं कृत

परभागो गुणोत्कर्ष इत्यमरः स्त्रीकृतं

सम्यक्प्रसाधितः सन्नपि

तूषणादरः ॥ प्रियानुरागेण विलासिनीजनः ॥ पथाउकाई नखमंजन श्रियाददौ हृदष्टीः प्रति
पक्षपाषितो ॥ ३९ ॥ धुनानताः सांडुरुहेषु चीरवो विलोकहाराश्च कैकीनपंक्तिषु ॥ नितां
तमोर्यीहृतकुंकुमे धवले नलेभिरे ताः परभागमूर्मिषु ॥ ४० ॥ रुदांनसिव्यस्तवेधकराहते कंपितं
रवं मृदंगध्वनिधीरमुझ्झति ॥ मुहुः स्तनैस्तौलैसमंसमादेदे मनोरमं नत्तमिव प्रवेपि
तं ॥ ४१ ॥ श्रियाहसद्भिः कमलानि सस्मितैरलंकृतांबुः प्रतिमागतैर्मुखैः ॥ कृतानुकु
ल्यासुरराजयोषितां प्रसादसाफल्यमवापजाह्नवी ॥ परिस्फुरन्मीनविघट्टितोरवः सु
रांगनास्त्रासविलोलदृष्टयः ॥ उपाययुः कंपितपाणिपल्लवाः सखीजनस्यापि विलोक

लो

ताडिताः उरवो यासां २

तालः कालक्रियामानं अमरः ४
गीतवाद्यनृत्यानां क्रियामानं ४

कथुरामा सखेमत्या

जनितैः २ कृत्रिमैः २ वेष्टितैः २

नीयतां ॥ ४२ ॥ नयादिवाश्लिष्य झषाहतेन सि प्रियं मुदानंदयति स्म मानिनी ॥ अकृत्रिमप्रेम
रसाहितैर्मनोहरं तिरामाः कृतकैरपीहितैः ॥ ४४ ॥ तिरोहितांतानि नितांतमाकुलैरपां विगा
हादलकैः प्रसारिभिः ॥ ययुर्वधूनां वदनानि तुल्यतां द्विरेफवृंदांतरितैः सरोरुहैः ॥ ४५ ॥
सरोजपत्रे परिलीनषट्पदे विशालदृष्टेः स्विदमू विलोचने ॥ शिरोरुहाः स्विन्नतपक्ष्म खिन्नैः
संहतेर्द्विरफवृंदं सुनिनादनिश्चलं ॥ ४६ ॥ अगूढहासस्फुटदंतकेसरं मुखं स्विदेतद्विकस
कलंसंशयेनेति शेषः २ त्नुपंकजं ॥ इति प्रलीनां नलिनीवने सखीं विदांबभूवुः सुचिरेण योषितः ॥ ४७ ॥ युग्मं ॥
करौ धुनाना नवपल्लवाकृती पयस्यगाधे किल जातसंभ्रमा ॥ सखीषु निर्वाच्यमधार्ष्ट्य

समानलक्षणात्मकवस्तुना यन्निगुह्यते । निजेनांगं तुनावापितन्मीलमिति स्मृतं । इति काव्यभेदप्रकाशे ०

सौमनस्यं नितायाः ३ ह विलसनशीला विलासिन्यः २

वारि अहह: अपनेय अनुनायेत्पर्थः २

दूषितं प्रियांशुः संश्लेषमवापमानिनी ॥ ४८ ॥ प्रियैः सलीलं करवारिवारितः प्रवृद्धनिश्वासविकंपि

परः तस्तनः ॥ सविभ्रमाधूतकराग्रपल्लवो यथार्थतामापविलासिनीजनः ॥ ४९ ॥ उदस्य धैर्यं काठिन्यं

दयितेन सादरं प्रसादितायाः करवारिवारितं ॥ मुखं निमीलन्नयनं नतभ्रुवः श्रियं सपत्नी परकृताधाः

पजलविसर्पर्थः वदनादिवाददे ॥ ५० ॥ विहस्य पाणौ विधृते धृतांभसि प्रियेण वध्वा मदनार्द्रचेतसः ॥ सखी

वकांचीपयसा घनीकृता बभार वीतोचयबंधमंशुकं ॥ ५१ ॥ निरंजने साचिविलोकितं दृ

शावयावकं वेपथुरोष्ठपल्लवं ॥ नतभ्रुवो मंडयति स्म विग्रहे बलक्रिया चातिलकं तदा अनुनयेः

पश्चात्

स्पदं ॥ ५२ ॥ प्रियेण सिक्ता चरमं विपक्षतश्चुकोप काचिन्न तुतोष सांत्वनैः ॥ जनस्य

कंपः २ मुक्तनीविग्रंथि २ रेखावंधः २ लिपगिर्थसाविलिर: इसमरः

गाढप्रेम्णाः कोपक्रोधामर्षरोषरुष इष्टिराकेकराकराकिंचित्स्फुटापांगेषुपातिता मीलितार्धादुरालोके ताराव्यावर्तनोत्तराइति

कुनोवाकेतो: गाढीभवति

रूढप्रणयस्य चेतसः किमप्यमर्षोनुनये भृशायते ॥ ५३ ॥ निमीलदाकेकरलोलचक्षु

उत्पतितो

षां प्रियोपकंठं कृतगात्रवेपथुः ॥ निमज्जतीनां श्वसितोद्धतस्तनः श्रमो नु तासां मदनो

आडंबरव २ नुपप्रथे ॥ ५४ ॥ इत्थं विहृत्य वनिताभिरुदस्यमानं पीनस्तनोरुजघनस्थलशालिनी

परिभवप्रापितेः

भिः ॥ उत्सर्पितोर्मिचयलंघिततीरदेशमौत्सुक्यनुन्नमिव वारि पुरः प्रतस्थे ॥ ५५ ॥

नियोज्य

तीरांतरेषु मिथुनानि रथांगनाम्नां नीत्वा विलोलितसरोजवनश्रियः ताः ॥ संरेजिरे

उडुगणा:

सुरसरिज्जलधौतहारास्तारावितानतरला इव यामवत्यः ॥ ५६ ॥ संक्रांतचंदनरसा

वर्णांतरापादनं हितवर्णभेदं विच्छिन्नभूषणमणिप्रकरांशुचित्रं ॥ बद्धोर्मिनाकवनितापरिभुक्तमुक्तं

सिंधोर्बभार सलिलं शयनीयलक्ष्मीं ॥ ५७ ॥ इति श्रीकिरातार्जुनीये महाकाव्ये लक्ष्म्यंके

शरते जनिशयनीयंतल्पं तरलतरंगं २

गम्भीरा मधुरे तरसंचले तरले द्वेअपेची ३

२ शर्करायां दधमुखेवास्वसितन्तुपतीमणौ इति विश्वः ३ खरस्पतीवरवेनेतिसरे ४ २ भानुः करो मरीच्यः स्त्रीपुंसयो ऽधिपि स्त्रियाम्

कुमारविकविकतो वनिता तायविहारो नामाष्टमः सर्गः ॥८॥ ॥७॥ वीक्ष्य रन्तुमनसः सु
रनारीरात्तचित्रपरिधानविभूषाः ॥ तत्प्रियार्थमिव यातुमथास्तं भानुमानुपपयोधि
ललम्बे ॥१॥ मध्यमोपलनिभे लसदंशावेकतश्च्युतिमुपेयुषि भानौ द्यौरुवाह परिवृत्ति
विलोलां हारयष्टिमिव वासरलक्ष्मीं ॥२॥ अंशुपाणिभिरतीव पिपासुः पद्मजं मधु
भृशं रसयित्वा ॥ क्षीबतामिव गतः क्षितिमेष्यन् लोहितं वपुरुवाह पतंगः ॥३॥ गम्य
तामुपगते नयनानां लोहितायति सहस्रमरीचौ ॥ आससाद विरहय्य धरित्रीं च
क्रवाकहृदयान्यभितापः ॥४॥ मुक्तमूललघुरुज्झितपूर्वः पश्चिमे नभसि संभृ
तसान्द्रः

मध्यातिक्रमेण — मधुमद्यपुष्परसेऽमरः — दर्शनीयः — पतंगो पक्षिसूर्यौ चेऽमरः ३ — अन्यत्र कुत्सितस्थले

बलिहस्तांशवः करा इत्यमरः ३ — उषः शब्दो संध्यामात्रे ग्राह्यः ४

सामि त्वर्धे जुगुप्सिते इत्यमरः — अर्धोसामितसति — सायंसायंप्रगे शतादिसमरः

सामि मज्जति रवौ न विरेजे खिन्नजिह्म इव रश्मिसमूहः ॥५॥ कांतदूत्य इव कुंकुमताम्राः सा
यमंडनमभित्वरयंत्यः ॥ सादरं ददृशिरे वनिताभिः सौधजालपतिता रविभासः ॥६॥ अग्रसा
नुषु नितांतपिशंगैर्भूरुहान्मृदुकरैरवलंब्य ॥ अस्तशैलगहनं नु विवस्वानाविवेश जल
धिं नु महीं नु ॥७॥ आकुलश्चलपतत्रिकुलानामारवैरनुदितौषसरागः ॥ आययावहरि
दश्वविपांडुस्तुल्यतां दिनमुखेन दिनांतः ॥८॥ आस्थितः स्थगितवारिदपंक्त्या संध्यया ग
गनपश्चिमभागः ॥ सोर्मिविद्रुमवितानविभासा रंजितस्य जलधेः श्रियमूहे ॥९॥ प्रां
जलावपि जने नतमूर्ध्नि प्रेम तत्प्रवणचेतसि हित्वा ॥ संध्ययानुविदधे विरमंत्या चा
पलेन सुजनेतरमैत्री ॥१०॥

अविद्यमानसूर्यः — ऊर्मिसंकोलसार्थः — दुर्जनसरवा

अतएवासेक्ष्यते अस्तमितेन ३ संध्यापगमानंतरं

चकाराश्चियां ध्वांतं तमिस्रं तिमिरं तमस्त्यमरः २ शकुंतिपक्षिशकुनिशकुंतशकुनद्विजाः इत्यमरः ५

औपसातपनया दिवलीनं वासरस्य विविसामापटीयः ॥ सन्निपत्य शनकैरथ निम्नादंध

कारमुदवाप समानि ॥ ११ ॥ एकतामिव गतस्य विवेकः कस्यचिन्न महतोप्युपलेभे ॥ भा

स्वता निदधिरे भुवनानामात्मनीव पतितेन विशेषाः ॥ इच्छतां सह वधूभिरभेदं या ४२

मिनीविरहिणां विहगानां ॥ आपुरेव मिथुनानि वियोगं लंघ्यते न खलु कालनियो

अभिमुखं यथा तथा गः ॥ १२ ॥ पक्षतिं निमुखं दयितेनयियासवं नितिकगतेव शकुंतौ ॥ नीयते स्म नतिमुज्झित

स्वरुकविकासं पंकजं मुखमिव हर्षमंपंकजं मुखमिवांबुरुहिण्या ॥ १४ ॥ रंजिता नु विविधास्तरुशैलानामितं नु गगनं

स्थगितं नु ॥ पूरिता नु विषमेषु धरित्री संहृता नु ककुभस्तिमिरेण ॥ १५ ॥ ॥ श्री ॥

दिशश्चककुभः काष्ठा आशाश्च हरितश्च ताः

अथा तद्दिकः कथं न स्यादिति भावः

...संभावनायोतकत्वं

तमिस्रास्त्री ध्वांतनिशि निरंधतमसे ... तमिस्रा शब्दो ... काळिदासः अंधतमसं ३

सर्वैतपस्यावर्णोरियदृष्टेः कल्पितलोकस्य कथं तमिस्रा ३

२१२

४ प्राचीतारकनाथेनक्षत्रनाथेनमीलिका। यानक्षत्रैतारकं तारकेति वैतिविश्वः ४

रात्रिरागमलिनानि विकासं पंकजानि रहयंति विहाय ॥ स्पष्टतारकमियाय नभश्रीर्वस्तुमि

च्छति निरापदि सर्वः ॥ १६ ॥ व्यानशे शशधरेण विमुक्तः केतकीकुसुमकेसरपांडुः ॥ चूर्णमुष्टि कर्पूरक्षोदकस्य

रिव लंभितकांतिर्वासवस्य दिशमंशुसमूहः ॥ १७ ॥ उज्झती शुचमिवाशु तमिस्रामंतिकं व्रज

वहतिस्म ति तारकराजे ॥ दिक्प्रसादगुणमंडनमूहे रश्मिहाससविशदं मुखमैंद्री ॥ १८ ॥ नीलनीरज प्राचीदिक्

निभे हिमगौरं शैलरुद्धवपुषः सितरश्मेः ॥ खे रराज निपतत्करजालं वारिधेः पयसि गांगमि

वांभः ॥ १९ ॥ पानिनु धदति नीलघनांधं ध्वांतमुद्यतकरेण पुरस्तात् ॥ क्षिप्यमाणमसि

तेतरभासा शंभुनेव करिचर्म चकासे ॥ २० ॥ अंतिकांतिकगतेंदुविसृष्टे जिह्मतां जहति संकोचं

दीधितिजाले ॥ निर्गतिं स्तिमितभारनिरोधादुच्छ्वसन्निव रराज दिगंतः ॥ २१ ॥ श्री

उदयानंतरं उक्षिपे ३ उदयरागादितिर्बर्वा तमिस्रा शब्दोंऽधकारमात्रे ३

दीपयन्नथ नभः किरणौघैः कुंकुमारुणपयोधरगौरः ॥ हेमकुंभइव पूर्वपयोधेरुन्ममज्ज
शनकैस्तुहिनांशुः ॥२२॥ लेखया विमलविद्रुमभासा संततं तिमिरमिंदुरुदासे ॥ दंष्ट्रया
कनककंकपिशंग्या मंडलं भुवइवादिवराहः ॥२३॥ उद्गतेंदुमविभिन्नतमिस्रां पश्यति
स्म रजनीमवितृप्तः ॥ व्यंशुकस्फुटमुखीमतिजिह्मां व्रीडयानववधूमिव लोकः ॥
॥२४॥ नप्रसादमुचितं गमिता द्यौर्नोद्धृतं तिमिरमद्रिवनेभ्यः ॥ दिङ्मुखेषु न च धामवि
कीर्णं भूषिता च रजनी हिमभासा ॥२५॥ मानिनीजनविलोचनपातानुष्णबाष्पक ॥४३॥
लुषान्प्रतिगृह्णन् ॥ मंदमंदमुदितः प्रययौ खं भीतभीत इव शीतमयूखः ॥२६॥

नोत्सारितं ३ दृष्टिपातान् २ विरहसिन २
कलहांतरस्याइकस्य

तारकाएववधूप्रियवधूः उपकंठंतिकाभ्यर्णी इत्यमरः करोपहारयोः पुंसि बलिः प्राण्यंगजे स्त्रियां ४ अमरः

त्कृष्यतः प्रियवधूरुपकंठं तारकास्ततकरस्य हिमांशोः ॥ उद्धमन्नभिरराज समंतादंगराग
इव लोहितरागः ॥२७॥ प्रोषितः शशधरेण करौघैः संहतान्यपि नुनोद तमांसि ॥ क्षीरसिंधु
रिव मंदरभिन्नः काननान्यविरलोच्चतरूणि ॥२८॥ सारतां गमितया शशिपादैश्छाय
या विटपिनां प्रतिपेदे ॥ न्यस्तशुक्लबलिचित्रतलाभिस्तुल्यता वसतिवेश्ममहीभिः ॥२९॥
आतपेऽधृतिमता सहवध्वा यामिनीविरहिणा विहगेन ॥ सेहिरे न किरणा हिमरश्मेर्दुःखि
ते मनसि सर्वमसह्यं ॥३०॥ गंधमुद्धतरजःकणवाही विक्षिपन्विकसतां कुसुमा
नां आदुधाव परिलीनविहंगा यामिनीमरुदपां वनराजीः ॥३१॥ संविधातुमभिषेक
मुदासे मन्मथस्य लसदंशुजलौघः ॥ यामिनीवनितया ततचिह्नः सोत्सको रजतकुंभइवेंदुः ॥३२॥

विस्तृतकलंकः उक्षिप्तः
२ यामिनीमरुत् २

जसापि खलु नेनमनंसासहायमुपयाति जयश्रीः ॥ यदि कुशाशिमयूखसखः सन्नादद दीप
विजयि चापमनंगः ॥ ३३ ॥ सज्जनाविखनादितभो नैरागतप्रियकथैरपिदूतैः ॥ सन्निकृष्ट
रतिभिः सुरदारैर्भूषितैरपि विभूषणमीषे ॥ ३४ ॥ नस्रजो रुरु चिरे रमणीभ्यश्चन्दना
नि विरहे मदिरा वा ॥ साधनेषु हि रतेरुपधत्ते रम्यतां प्रियसमागम एव ॥ ३५ ॥ प्रास्खलत
भिरपि नाथनिसंधासितापि सखीवचनाभिः ॥ कामिनी भिरपहास्तितधैर्यैः सादर

मन्म ॥ ४५ ॥
नापि मदोवललंवे ॥ ३६ ॥ कांतवेश्मबहुसंदिशतीभिर्यातमेव रतये रमणीभिः ॥ मन्म
थेन परिलुप्तमतीनां प्राय शास्खलितमप्युपकारि ॥ ३७ ॥ आसु कांतमभिसारितवसाया

षितः पुलकरुद्धकपोलं ॥ निर्जिगाय मुखमिंदुमखंडं खंडपत्रतिलकाकृति कांत्या ॥ ४२ ॥ उच्यतां
स वचनीयमशेषं नेश्वरे परुषता सखि साध्वी ॥ आनयैनमनुनीय कथं वा विप्रियाणि जनय
न्ननुनेयः ॥ ४३ ॥ किं गतेन नहि युक्तमुपेतुं कः प्रिये सुभगमानिनि मानः ॥ योषितामिति कथा
सु समेतैः कामिभिर्बहुरसा धृतिरूहे ॥ ४४ ॥ युग्मं ॥ योषितः पुलकरोधि दधत्या घर्मवारि न
वसंगमजन्म ॥ कांतवक्षसि बभूव पतंत्या भूषणं लुलितमंगनतैव ॥ ४५ ॥ सीधुपानविधु
रासु निरस्तान् मानमाशु शिथिलीकृतलज्जाः ॥ संगतासु दयितैरुपलेभे कामिनी
पानविधुरासु निरस्तान मानमाशु शिथिलीकृतलज्जाः ॥ संगतासु दयितैरुपलेभे कामिनी
षु मदनो नु मदो नु ॥ ४६ ॥ द्वारि चक्षुरधिपाणिकपोलौ जीवितं त्वयि कुतः कलहोस्याः
॥ कामिनामिति वचः पुनरुक्तं प्रीतये नवनवत्वमियाय ॥ ४७ ॥ सा विलोचनपुनर्मर्पयंती

अथसंभोगशृंगारः ॥ हतवचापिवाळारतिमाह ४

उंधतीदयितवक्षसिपातं ॥ सुभ्रुवोजनयतिस्मविभूषांसंगतावुपरतां बलज्जा ॥४५॥ सव्यलीक
मवधीरितखिन्नं प्रस्थितंसपदिकोपपदेन ॥ योषितःसुहृदिवस्मरुणद्धि प्राणनाथमभिबा
ष्पनिपातः ॥४६॥ शंकितायकृतवाष्पनिपातामीर्ष्ययाविमुखितांदयितायाः ॥ मानिनीम
भिमुखस्थितचित्तां शंसतिस्मघनरोमविभेदः ॥४७॥ लोलदृष्टिवदनंदयितायाश्चुंबति
प्रियतमेरभसेन ॥ व्रीडयासहविनीविनितंबादंशुकंशिथिलतामुपपेदे ॥४८॥ ह्रीयंत्र ॥४८॥
गलितनीविनिरस्यन्नंतरीयमवलंबितकांचि ॥ मंडलीकृतपृथुस्तनभारंसस्वजे
दयितयाहृदयेशः ॥४९॥ आहतानखपदैःपरिरंभाश्चुंबितानिघनदंतनिपातैः ॥

वात्स्यायनः । वाह्यमभ्यंतरंचेतिद्विविधंरतमुच्यते ॥ तत्राद्यंचुंबनंश्लेषनखदंतक्षतादिकं ॥ द्वितीयंसुरतंसाक्षान्नाम करणकल्पितं ३

ननुसुकुमारसकामतंत्रेकथंपीडाकरे ॥ धादरइतिनवाच्यमित्याह ॥

सौकुमार्यगुणसंभृतकीर्त्तिर्वामएवसुरतेष्वपिकामः ॥४५॥ पाणिपल्लवविधूननमंतःसीत्कृ
तानिनयनार्द्धनिमेषाः ॥ योषितांरहसिगद्गदवाचामस्त्रतामुपययुर्मदनस्य ॥५०॥
पातुमाहितरतिन्यभिलेषुस्तर्षयत्स्वमुनरुत्सुरसानि ॥ सस्मितानिवदनानिवधूनांसोप
ानिरमधुनिपुवानः ॥५१॥ कांतसंगमपराजितमन्योवारुणीरसनशांतविवादः ॥ मा
निनीजनउपाहितसंधौसंदधेधनुषिनेषुमनंगः ॥५२॥ कुप्यतांभवतांनतचित्तोकां
भितांश्चवररवस्यतयूनः ॥ इत्यनेकउपदेशइवस्मस्वाद्यतेयुवतिभिर्मधुवारः ॥५३॥ भर्तृ
भिःप्रणयसंभ्रमदत्तांवारुणीमतिरसांरसयित्वा ॥ ह्रीविमोहविरहादुपलेभेपाटवंनुरु
दर्शनुवत्सनिः ॥५४॥ स्वादितःस्वयमथैधितमानंलंभितःप्रियतमैःसहपीतः ॥ आसवः

मधुवारामधुक्रमः इत्यमरः ३

प्रेमादराभ्यां

संभ्रमःसाध्वसेपिस्यात्संवेगादरयोरपिइतिविश्वः २

सरागःक्षिप्रियाताशायासक्तकरुणात्मतेरसाः २ करुणात्मनी २

कल्लकंकल्यंतथामदामदैरयं कपिशायनं ॥ माध्वीकंमाधवकोप्यन्योपरिभावा

कृष्णमधुइतिहलायुधः ४

युगपदेकपात्रेणपीतइत्यर्थः

दश्यत इति विदंश: ३ — विडंबितुमिव २

प्रतिपदं प्रमदानां नैकरूपरसतामिव भेजे ॥५५॥ अन्वविलाससुमनगाननुकर्तुं विभ्रमानिवव
धूनयनानां ॥ आददे मृदुविलोलपलाशैरुत्पलैश्चषककल्पितेषु कंपम् ॥५६॥ ओष्ठपल्लव
विदंशतां गतानां हृतनामुपययौ रमणानां ॥ फुल्ललोचनविनीलसरोजैरंगनास्यचषकै
र्मधुवारः ॥५७॥ प्राप्य तेगुणवतापि गुणानां व्यक्तमाश्रयवशेन विशेषः ॥ तत्तथा हि दयि
ताननदत्तं व्यानशे मधुरसातिशयेन ॥५८॥ विस्फुरल्लघुचषकेष्वतिरिक्तां कांतदंतपदमंड
नलक्ष्मीं ॥ जज्ञिरे बहुमताः प्रमदानामोष्ठयावकनुदो मधुवाराः ॥५९॥ लोचनाधरकृताहृतरागा
रागावासिताननविशोषितगंधा ॥ वारुणी परगुणात्मगुणानां व्यत्ययं विनिमयं नु वितेने ॥६०॥ तुल्यदस्कसंरागे
त्वरूपमसितोत्पलमक्ष्णोः कर्णगं निरुपकारि विदित्वा ॥ योषितः सुहृदिव प्रवि[illegible]लंभितेक्ष

चषकोष्ठपानपात्रमि० पानपात्राणि
आतिविंबितामि तिरोभः २
कश्यपस्थितानां २
कर्णावतंसीकृतं असितोत्पलं
उत्पलस्य बंधुरिव २
शोभादिकं वस्तु परिच्छित्तिर्विषयः बुद्धिर्दृष्टुमिव निमयः २
वर्णांतरापादनेन प्रविलंभितः ०

नतानां दर्शयेदतिशायनिषेधावरणनिं ६
म यावालक्तोदमालम्पद्मस्मरः २ रक्ततया शोभितनेत्रेषु २

णरुचिर्मदरागः ॥६१॥ क्षीणयावकरसोप्यतिपानैरार्द्रदंतपदलंछितशोभः ॥ आययावतितरा
मिवबध्याः सांद्रताधरपल्लवरागः ॥६२॥ रागकांतनयनेषु नितांतं विद्रुमारुणकपोलतलेषु ॥ स
र्वगापि ददृशे वनितानां दर्पणेष्विव मुखेषु मदश्रीः ॥६३॥ बद्धकोपविकृतीरपि रामाश्चारुतामभिमतां
मुपनिन्ये ॥ वश्यतां मधुमदो दयितानामात्मवर्गहितमिच्छति सर्वः ॥६४॥ वाससां शिथिलतामु
पनाभि ह्रीनिरासमपदे कुपितानि ॥ योषितां विदधती गुणपक्षे निर्ममार्ज मदिरा वचनीयं ॥६५॥
नर्तुमुपसखि निक्षिपतीनां [illegible] मदोपमितानां ॥ व्रीडया विफलया वनितानां नास्थि
तं मनागमतं हृदये भय ॥६६॥ उंधती नयनवाक्यविकासं सादितोभयकरा परिरंभे ॥ व्रीडितस्य ल
लितं युवतीनां क्षीबता बहुगुणैरनुजह्रे ॥६७॥ योषिदुद्धतमनोभवरागा मानवत्यपि ययौ दयितांकं

सखीसमक्षं
भिन्नमितिपरिणामेन हृदये मुनास्थितं २ दोषान्वयेतानगणीयु वंतीस्पर्धा ४ निंदां निर्ममार्ज शोधयति स्म ४
हृदिप्रियकांचापेक्षितेन
अनुकारेण कुहारस्यात् २ अनुकार २
कमरिकः २

४ एतानि कच भूतानि प्रमदानां प्रेमप्रतिकामापि अप्रवृत्ति भुवं घ्रकर्षवशां नयंति प्रा यंतिस्म ६ सत्यपः ४

रहस्योद्घाटनं । आकूतसंसेवमनोहरत्वां संप्रति शशिदितेनु । व्यापारस्य ।

कारयत्यनिभृतागुणदोषे वारुणी खलु रहस्यविभेदं ॥६८॥ आहिते नमसुना मधुरत्वे चेष्टितस्य

गमिते नु विकारं ॥ आबभौ नवरवोढ़तरागः कामिनीष्ववसरः कुसुमेषोः ॥६९॥ मा गमन्मद

विमूढधियो नः प्रोज्झ्य रन्तुमिति शंकितनाथाः ॥ योषितो न मदिरां भृशमीषुः प्रेम पश्यति भयान्य

पदेपि ॥७०॥ चित्तनिर्वृतिविधायिविविक्तं मन्मथो मधुमदः शशिभासः ॥ संगमश्च दयितैः

स्मनयन्ति प्रेम कामपि भुवं प्रमदानां ॥७१॥ धार्ष्ट्यलंघितयथोचितभूमौ निर्दयं विलुलिता

ष्ठकमाल्ये ॥ मानिनीरतिविधौ कुसुमेषुर्मत्तमत्त इव विभ्रममाप ॥७२॥ शीधुपानविधुरेषु वधूषु ॥४७॥ श्रीः

घ्नतीनि घ्नतामुपगतेषु वपुष्षु ॥ ईहितं रतिरसाहितभावं वीतलक्ष्यमपि कामिषु रेजे ॥७३॥

अन्योन्यसक्तमनसामथ बिभ्रतीनां चेतोभुवः सुरसखाप्सरसां निदेशं ॥ वैबोधिकध्व

चुंबनताडनादि चेष्टितं २ सुरतखादेः २ दत्तचित्तं २ निर्विषयस्थानकृतमपि २ विधुरं जातं वेतेस्यात् क ...

४ चुंबनताडनभणितसीत्कारपुरुषायितादौ स्वयमुत्कृष्टखलु ... रिति भावः ४

३ संवाहनं वाहनोपिनरादेरंगमर्दने ३

निद्रया दूरीकृतः संभोगश्रमो येषां ०

निविभावितपश्चिमार्धा सा संहृतेव परिवृत्तिमियाय रात्रिः ॥७४॥ निद्राविनोदितनितान्तरति

क्लमानामायामिमंगलनिनादविबोधितानां ॥ रामासु भाविविरहाकुलितासु यूनां तत्पूर्व

तामिव समादधिरे रतानि ॥७५॥ कान्ताजनं सुरतखेदनिमीलिताक्षं संवाहितुं समुपयानिव

मंदमंदं ॥ हर्म्येषु माल्यमदिरापरिभोगगंधानाविश्चकार रजनीपरिवृत्तिवायुः ॥७६॥ आ

मोदवासितचलाधरपल्लवेषु निद्राकषायितविपाटललोचनेषु ॥ व्यामृष्टपत्रतिलकेषु

विलासिनीनां शोभां बबंध वदनेषु मदावशेषः ॥७७॥ गतवति नखलेखालक्ष्यतामंगरा

गे समदयितपीताताम्रबिंबाधराणां ॥ विरहविधुरमिष्टा सत्सखीवांगनानां हृदयमवलं

लंबे रात्रिसंभोगलक्ष्मीः ॥७८॥ इति श्री किरातार्जुनीये महाकाव्ये लक्ष्म्यंके नारविकावि ॥

कृतौ संभोगवर्णनो नाम नवमः सर्गः ॥ ९ ॥ श्रीः ॥ ॥ छ ॥ ॥ अथ परिमळजामवाप्य
लक्ष्मीमवयवदीपितमंडनश्रियस्ताः ॥ वसतिमभिविहाय रम्यहावाः सुरपतिसूनुविलोभना
य जग्मुः ॥ १ ॥ द्रुतपदमभियातुमिच्छतीनां गगनपरिक्रमलाघवेन तासां ॥ अवनिषु चरणैः
पृथुस्तनीनामलघुनितंबतया चिरं निषेदे ॥ २ ॥ विहितसरसयावकैर्बभासे चरणतलैः कृ ४८
तपद्धतिर्वधूनां ॥ अविरलविततेव शक्रगोपैररुणितनीलतृणोलपा धरित्री ॥ ३ ॥
ध्वनिरगविवरेषु नूपुराणां पृथुरसनागुणसिंजितानुयातः ॥ प्रतिरवविततो वनानि च
क्रे मुखरसमुत्सुकहंससारसानि ॥ ४ ॥ अवचयपरिभोगवंति हिंस्रैः सहचरितान्यमृगा

णि काननानि ॥ अभिदधुरभितो मुनिं वधूभ्यः समुदितसाध्वसविक्लवं च चेतः ॥ ५ ॥ नृप
तिमुनिपरिग्रहेण सा भूः सुरसचिवाप्सरसां जहार चेतः ॥ उपहितपरमप्रभावधाम्नां न
हि जयिनां तपसामलंघ्यमस्ति ॥ ६ ॥ सचकितमिव विस्मयाकुलाभिः शुचिसिक
तास्वतिमानुषाणि ताभिः ॥ क्षितिषु ददृशिरे पदानि जिष्णोरुपहितकेतुरथांगलां
छनानि ॥ ७ ॥ अतिशयितवनांतरद्युतीनां फलकुसुमावचयेपि तद्विधानां ॥ ऋतुरि
व तरुवीरुधां समृद्ध्या युवतिजनैर्जगृहे मुनिप्रभावः ॥ ८ ॥ मृदितकिसलयः सुरांगनानां स
सलिलवल्कलभारभुग्नशाखः ॥ बहुमतिमधिकां ययावशोकः परिजनतापि गुणाय

...निस्तेयब्रह्मचर्यापरिग्रहाः यमाः॥१

तपःशौचसंतोषस्वाध्यायेश्वरप्रणिधानानि नियमाः२

जातवेदा हिरण्य अस्मादिति जातवेदा वह्निः ...सिद्धिनः २

अभ्युदयकांडेत्रामः शांतिः९

अपचारकांडे उद्यता

सद्गुणानां ॥ यमनियमकृशीकृतस्थिरांगः परिददृशे विधृतायुधः स ताभिः ॥ अनुपमशम

दीप्तितागरीयान्कृतपदपंक्तिरथर्वणेव वेदः ॥१०॥ सुरसरितिपरंतपोधिगच्छन्विधृत

पिशंगबृहज्जटाकलापः ॥ हविरिव वितनतः शिखासमूहैः समभिलषन्नुपवेदिजातवे

दाः॥११॥ शशधरखलोचनाभिरामैर्गगनविसारिभिरंशुभिः परीतः ॥ शिखरनिचय

मेकसानुसद्मा सकलमिवापि दधन्महीधरस्य ॥१२॥ सदृशमतनुमाकृतेः प्रयत्नं

तदनुगुणामपरैः क्रियामलंघ्यां ॥ दधदलघुतपः क्रियानुरूपं विजयवतीं च तपः

समां समृद्धिं ॥१३॥ चिरनियमकृशोपि शैलसारः शमनिरतोपि दुरासदः प्रकृत्या

कुलाभिलोषेण तेजोषः २

॥४९॥ श्रीः

तपोनुरूपमैश्वर्यं९ कृतुमिशाकपामिसर्थः२ आकृतिः कथिता रथेसामान्यवपुषोरितिविश्वः३

ससचिव इव निर्जनेपि तिष्ठन्मुनिरपि तुल्यरुचिस्त्रिलोकभर्तुः ॥१४॥ कुलकं ॥ तनुमवजितलोक

सारधाम्नीं त्रिभुवनगुप्तिसहां विलोकयंत्यः ॥ अवययुरमरस्त्रियोस्य यत्नं विजयफले विफलं त

पोधिकारे ॥१५॥ मुनिदनुतनयान्विलोभ्य सद्यः प्रतनुबलान्यधितिष्ठतस्तपांसि ॥ अलघु

नि बहुमेनिरे च तास्वं कुलिशभृता विहितं पदे नियोगं ॥१६॥ अथ कृतकविलोभनं विधि

त्सौ युवतिजने हरिसूनुदर्शनेन ॥ प्रसभमवततार चित्तजन्मा हरति मनो मधुरा हि यौवनश्रीः

॥१७॥ सपदि हरिसखैर्वधूनिदेशाद्ध्वनितमनोरमवल्लकीमृदंगैः ॥ युगपदृतुगणस्य

संनिधानं वियति वने च यथायथं वितेने ॥१८॥ सजलजलधरं नभो विरेजे विवृतिमि

तिर परप ण

आविष्कृतो वीयथास्वं यथातथं असंकरेणसर्थः७ वितस्तारे०

यथास्वमिति पाथायर्थमिति निपातः०

सुमनामालती जातिरित्यमरः २

अर्जुनाश्वमं प्रति २

पायरुचिस्तडिल्लतानां ॥ व्यवहितरतिविग्रहैर्वितेने जलगुरुभिः स्तनितैर्दिगंतरेषु ॥२०॥ परिशु
रपतिस्तु धाम सद्यः समुपदधन्मुकुलानि मालतीनां ॥ विरलमपजहार बद्धबिंदुः सरजसता
संवर्धि मवनेरपां निपातः ॥२१॥ प्रतिदिशमनुगाढताभिमृष्टः ककुभविकाससुगंधिनानिलेन ॥ न
वइव विबभौ स चित्तजन्मा गतधृतिराकुलितश्च जीवलोकः ॥२२॥ व्यथितमपि भृशं मनो हरंती ५०
परिणतजंबुफलोपभोगहृष्टा ॥ परभृतयुवतिः स्वनं वितेने नवनवयोजितकंठरागरम्यं ॥२३॥
अभिलषति मनः कदंबवायौ मदमधुरे च शिखंडिनां निनादे ॥ जन इव न धृतेश्चचाल जिष्णु
र्नहि महतां सुकरः समाधिभंगः ॥२४॥ धृतबिसवलयावलीर्वहंती कुमुदवनैकदुकूलमा

इंद्रदुः ककुभोऽर्जुनः ३

बार्हस्पत्यफले जंबू जंबूर्स्त्री जंबु जांबवं इत्यमरः ३

सर्जकासनबंधूकपुष्पप्रियकजीवका इत्यमरः ३

...प्रियाशरं इति स्मरणात् — बाणो कनीलकिंटी चेति वैजयंती

आताबाणानीलकंटीयया सा

त्तबाणा ॥ शरदमलतले सरोजपाणौ घनसमयेन वधूरिवाललंबे ॥२५॥ समदशिखिरुतानि हंसना
दैः कुमुदवनानि कदंबपुष्पवृष्ट्या ॥ श्रियमतिशयिनीं समेत्य जग्मुर्गुणमहतां महते गुणाय यो
गः ॥२६॥ सरजसमपहाय केतकीनां प्रसवमुपांतिकनीपरेणुकीर्णं ॥ प्रियमधुरसना
निषट्पदालिर्मलिनयति स्म विनीलबंधनानि ॥२७॥ मुकुलितमतिशय्य बंधुजीवं धृतज
लबिंदुषु शाद्वलस्थलीषु ॥ अविरलवपुषः सुरेंद्रगोपा विकचपलाशचयः श्रियं समीयुः ॥२८॥
अविरलफलिनीवनप्रसूनः कुसुमितकुंदसुगंधिगंधवाहः ॥ गुणमसमयजं चिराय लेभे वि
रलतुषारकणस्तुषारकालः ॥२९॥ निचयिनि लवलीलताविकासे विरचति लोध्रसमीर

प्रियकपुष्पाणि

बंधूको बंधुजीवका इत्यमरः

प्रियंगुः फलिनी फली इत्यमरः

माध्यं कुंदमित्यमरः २

पलाशे किंशुकः पर्ण इत्यमरः ३

२ सिंधुवारेऽङ्कुरसौ निर्गुंडी शाविके त्यपि स्मरः=२

३ तुंपेदवश्यमः कृत्येतुं कामम्मन सोरर्थपतिम कारलोपः=२

नोत्सुर्व॥ विकसितमुपययौ न पांडुरस्तनुभृतकतिथ्वनेर्न्व जिगीषतां हि चेतः ॥२९॥ कतिपयसहकारपु

ष्परम्यस्तनुतुहिनोल्पविनिद्रसिंधुवारः ॥ सुरभिमुखहिमागमांतशंसी समुपययौ शिशिरस्मर

रैकबंधुः ॥३०॥ कुसुमनगवनान्युपैतुकामा किसलयिनीमवलंब्य चूतयष्टिं ॥ क्वणदलिकुल

नूपुरां निरासे नलिनवनेषु पदं वसंतलक्ष्मीः ॥३१॥ विकसितकुसुमाधरं हसंतीं कुरबकराजिव

धूं विलोकयंतं ॥ ददृशुरिव सुरांगना निषण्णं सशरमनंगमशोकपल्लवेषु ॥३२॥ श्वसनचलित

पल्लवाधरोष्ठे नवविहितेर्ष्यमिवावधूनयंती ॥ मधुसुरभिणि षट्पदेन पुष्पे मुख इव शाललतावधूश्चुचुंबे

॥३३॥ मुकुरतुपतत्ताविधूयमानं विरचितसंहति दक्षिणानिलेन ॥ अलिकुलमलकाकृतिं प्रपेदे नलि

पक्वं पांडुरा सादित्यर्थः ४

कामुकत्येति शेषः ३

अनुधावता कृतकोपमिव २

पल्लवसंस्तरे स्तरे स्थितमित्यर्थः ३

निस्यविजयित्वादिति भावः ३

प्राकारवृक्षयोः शालः शालः सर्जतरुस्मृतः इति शाश्वतः २

५९

पुष्पचापो मदनः २

२ लोके योग्यस्तनानुमतिः २

३ दैसे चैत्रे वसंते च मधे पुष्परसे मधुरिज्वः २

निमुखांतविसर्पिपंकजश्रीः ॥३४॥ प्रभवति न तदा परो विजेतुं भवति जितेंद्रियता यदात्मरक्षा ॥ अवजित

भुवनस्तथा हि लेभे सिततुरगो विजयं न पुष्पमासः ॥३५॥ कथमिव तव संमतिर्भवित्री सममृतुभिर्मुनिना

वधीरितस्य ॥ इति विरचितमाल्लिको विकासः स्मयत इवस्म मधुं निदाघकालः ॥३६॥ बलवदपि बलं मि

थो विरोधि प्रभवति नैव विपक्षनिर्जयाय ॥ भुवनपरिभवीनयत्तदानीं तमृतुगणः क्षणमुन्मनीचका

र ॥३७॥ श्रुतिसुखमुपवीणितं सहायैरविरललांछनहारिणश्च कालाः ॥ अविहितहरिसूनुविक्रि

याणि त्रिदशवधूषु मनोभुवं वितेनुः ॥३८॥ न दलति निचये तथोत्पलानां न च विषमच्छदगुच्छयू

थिकासु ॥ अभिरतिमुपलेभिरे यथासां हरितनयावयवेषु लोचनानि ॥३९॥ मुनि

तिरस्कृतस्य

परस्परस्पर्धी

तासां सहचरैर्गंधर्वैः ३

वसंताद्यृतवः ३

सप्तपर्णो विशालत्वक् शारदी विषमच्छदः २

३ वास्यादिकस्योपमयोरवार्थेपिसमुच्चयेइतिविश्वः = ३

मभिमुखतां निनीषवोयाः समुपययुः कमनीयतागुणेन ॥ मदनमुपदधे स एव तासां दुर
धिगमा हि गतिः प्रयोजनानां ॥ ४० ॥ प्रकृतिमभिससार नाभिनेयं प्रविकसदंगुलिपाणि
पल्लवं वा ॥ प्रथममुपहितं विलासि चक्षुः सिततुरगेन चचार नर्तकीनां ॥ ४१ ॥ अभिनय
मनसः सुरांगनाया निहितमलक्तकवर्त्तनाभिताम्रं ॥ चरणमभिपपात षट्पदाली
धृतनवलोहितपंकजाभिशंका ॥ ४२ ॥ अविरलमलसेषु नर्तकीनां द्रुतपरिषिक्तम
लक्तकं पदेषु ॥ सवपुषमिव चित्तरागमूहुर्नमितशिखानि कदंबकेसराणि ॥ ४३ ॥ नृ
पसुतमभितः समन्मथायाः परिजनगात्रतिरोहितांगयष्टेः ॥ स्फुटमभिलषितं बभूव

अर्जुनंअभितः० वध्वाः० सखीजनस्यगात्रे

२ नर्त्तकीपादपीडनाद्धानिनमिताग्राणि २

अलक्तकविहलंति कविन्नभवतीति नायः २

रसाभावादिद्यंजकचेष्टाविशेषः अंजकाभिनयोस माविसमरः ३

५२

४ निर्वर्णनंतुनिध्यानंदर्शनालोचनेक्षणामित्यमरः ४

अथपंचभिर्मुनिंप्रतिदूतिकावाक्यमाह ४

वध्वा वदति हि संवृतिरेव कामितानि ॥ ४४ ॥ अभिमुनि सहसा हृते परस्या घनमरुता जघनांशु
कैकदेशे ॥ चकितमवसनोरु सत्रपायाः प्रतियुवतीरपि विस्मयं निनाय ॥ ४५ ॥ धृतबिसवल
ये निधाय पाणौ मुखमधिरूषितपांडुगंडलेखं ॥ नृपसुतमपरा स्मराभितान्तायादमधुमदाल
सलोचनं निदध्यौ ॥ ४६ ॥ सखि दयितमिहानयेति सा मां प्रहितवती कुसुमेषुणाभितप्ता ॥
हृदयमहृदया न नाम पूर्वं भवदुपकंठमुपागतं विवेद ॥ ४७ ॥ चिरमपि कलितान्यपारयंत्या
परिगदितुं परिशुष्यता मुखेन ॥ गतघृणगमितानि सत्सखीनां नयनयुगैः सममार्द्रतां
मनांसि ॥ ४८ ॥ अचकमत सपल्लवां धरित्रीं मृदु सुरभिं विरहय्य पुष्पशय्यां ॥ भृशमरतिम

अद्यापितांनानुकंपयसिइत्यर्थः २

संदष्टुबुध्यायोजिता न्यपि वचनानि शिष्टः ३

पुनरप्रथमेत्रेदेश इतिविश्वः २ बाजिष्यति

अस्याःदुरवस्थलाव सफलंमनोरथाःअस्य

वाप्य तत्रचास्यास्तवसुरवशीतमुपैतुमंकमिछा ४९ तदनघतनुरस्कसासकाभावजातिपुत्राहि
परासुतांलदर्थे॥पुनरपिसुलभंतपोनुरागीयुवतिजनःखलुनाप्यतेनुरूपः॥५०॥जहिहिक कुन्तलं ३
ठिनतांप्रपद्यखवाचंननुकरुणाम्रदुमानसांमुनीनां॥उपमतमवधीरयंसभवाःसानिपुण
मस्कयाचिदेवमस्ये॥५२॥कुलकं॥सललितनवलितत्रिकाभिरामाशिरसिजसंयम श्रीः
नाकुलैकपाणिः॥सुरपतितनयेपरानिरासेमनसिजजैत्रशरंविलोचनाई॥५३॥कुसुतम ५३॥
वलंब्यवृत्तसुखैस्तनुरिभकुंभपृथुस्तनानितांगी॥तदभिमुखमनंगचापयष्टिविस्तृतगुर्वसमु
त्तनामकाचित्॥५४॥सरभसमवलंब्यनीलमन्याविगलितनीविविलोलमंतरीयं॥

समुज्जज्जनमवकारस्यर्थः २ नीलमास्कंनीलंवस्त्रं विश्लथबंधं स्तानाद्गलितं परिधानं

विस्तनविस्तृतं ×मोज्यासिंजिनीगुणः २

अनंगचापयष्टिरिवाद्धष्टमुक्तेतिभावः २

बहुसंदानलमस्मुद्रितंसंधितंसितंस्यमरः २ किमर्थमिसर्थः

कोदापइतिशेषः २ काचिद्युम्नाह शांतिर्यथास्तीतिशेषः

गंतुमुद्यतेत्यर्थः

अभिपतितुमनाःससाध्वसेवचकृतरसनागुणसंदितासतस्थे॥५४॥पदिमनसिशंमःकिंसंगचापंशठविष
यास्तववल्लभानुमुक्तिः॥भवतुदिशतिनान्यकामिनीभ्यस्तवहृदयेहृदयेश्वरावकाशं॥५५॥इतिविष सत्सितं
मितचक्षुषाभिधायस्फुरदधरोष्ठमसूययाकयाचित्॥अगणितगुरुमानलज्जयासौस्वयमुरसि
श्रवणोत्पलेनजघ्ने॥५६॥युग्मं॥सविनयमपराभिसृत्यसाविस्मितसुभगैकलसत्कपोललक्ष्मीः॥ त्रपानिरस्तात्किंत
श्रवणनियमितेनकंबिदध्यौसकलमिवासकलेनलोचनेन॥५७॥करुणमभिहितैस्त्रपानिरस्ता
मदभिमुखंचविमुक्तमश्रुताभिः॥प्रकुपितमभिसारणेधुनेतुंप्रियमियतीध्रुवबालजनस्यभूः परमावधि २
मिः॥५८॥असकलनयनेक्षितानिलज्जागतिमलसंपरिपांडुताविषादः॥इतिविविधमिया

पांडुवर्णत्वं इष्टानवाप्तिनिमित्तेशापतोभंगः

किंबहुना अश्रुचविमुक्तं अतःपरंनकिंचिद्विधेयमस्तीत्यर्थः २

अस्फुटोच्चारणात्तनवधावरिनाः ३ भिन्नैयैः ३ सर्वत्रवाशब्दः समुच्चये २

अतः मासीं अगाभूषितानां ० अखिलभूषणमेवेति भावः ० अवस्थासु इति शेषः ०

यत्तास्सुभ्रूषांप्रभवतिमंडयितुंवैखरनंगः ॥५९॥ अलसपदमनोरमंप्रकृत्याजितकलहंसवधूगतिप्र
यातं ॥ स्थितमुरुजघनस्थलातिभारादुदितपरिश्रमजिह्मितेक्षणं वा ॥६०॥ भृशकुसुमशरेषु
पातमोहादनवसितार्थपदाकुलोभिलापः ॥ अधिकविततलोचनं वधूनामयुगपदुन्नमितभ्रुवी ५४
क्षितं वा ॥६१॥ रुचिकरमपिनार्थवद्बभूव स्तिमितसमाधिशुचौ पृथातनूजे ॥ ज्वलयति महता
मानिनां समर्थैर्नहिलभतेऽवसरं सुखाभिलाषः ॥६२॥ कालापकं ॥ स्वयं संराध्यैवं शतमखमखं अविलुंतेन २
डेन तपसा परोक्षितत्वाल्लभ्यामभिलषति लक्ष्मीं हरिसुते ॥ मनोभिः सोद्वेगैः प्रणयविहतिध्वस्त
रुचयः सगंधर्वा धामत्रिदशवनिताः स्वं प्रतिययुः ॥६३॥ इति श्री किरातार्जुनीये महाकाव्ये

सुचिः कौस्यवरोमीसितितिणीकस्यहायोरितिवैजयंती ४ उपलक्षिताः २

दिनीतउवस्थितः ४

असरोमुखाश्रुतया २ प्रतीताहृष्टमानसः २ अप्सरःप्रयाणानंतरं ०

जिष्णुः शक्रे अर्जुने २

लक्ष्यं के भारविकविकृतौ अर्जुनविलोभनं नाम दशमः सर्गः ॥१०॥ छ ॥ ३ ॥ छ ॥ श्रीः ॥ अथामर्षान्नि
सर्गाच्च जितेंद्रियतया तया ॥ आजगामाश्रमं जिष्णोः प्रतीतः पाकशासनः ॥१॥ मुनिरूपोनुरू दर्शनप्रयाणयोरन्यतरार्थः ३
पेण सूनुना ददृशे पुरः ॥ द्राघीयसा वयोतीतः परिक्लांतः किलाध्वना ॥२॥ जटानां कीर्णया
उपलक्षित इति शेषः ४ केशैः संहत्या परितः सितैः ॥ पृक्तयेंदुकरैरह्नः पर्यंत इव संध्यया ॥३॥ विशदभ्रूयुगच्छन्नव
अपांगो नेत्रयोरंतावित्यमरः ३ लितापांगलोचनः ॥ प्रालेयविततिम्लानपलाशाब्ज इव ह्रदः ॥४॥ आसक्तभरनीकाशैरंगैः उपलक्षित इति शेषः ३
परिकृशैरपि ॥ आद्यूनः सद्गृहिण्येव प्रायो यष्ट्यावलंबितः ॥५॥ गूढोपि वपुषा राजन्नूधा दीप्यमानः ३
म्नालोकाभिभाविना ॥ अंशुमानिव तन्वभ्रमंडलच्छन्नमंडलः ॥६॥ जरतीम
जीर्णो जीनाजर्णजरंतमित्य०

भासित इति शेषः २
आद्यूनस्यादौदरिको विजिगीषाविवर्जितः इत्यमरः २ सभारथकुरुभवद्धिस्थिरार्थः ३

तद्वाचरेणप्रेम्णा पर्याप्तः २ तेजस्वी दर्शनाद्रूपं भवति सन्तुन्न दुःख जनक तेषां ३

पिबन्निवाणस्ते नुमप्राकृता कृतिः॥ चकारा क्रान्तलक्ष्मीकं ससाध्वसमिवाश्रमं॥ ७॥ अभि

तस्तं पृथासूनुः स्नेहेन परितस्तरे॥ अविज्ञातेपि बंधौ हि बलात्प्रल्हादते मनः॥ ८॥ आ

तिथेयीमथासाद्य सुतादपचितिं हरिः॥ विश्रम्य विष्टरे नाम व्याजहारेति भारतीं॥ ९॥ त्वया

साधु समारंभि नवे वयसि यत्तपः॥ ह्रियते विषयैः प्रायो वर्षीयानपि मादृशः॥ १०॥ श्रेयसीं तव सं ॥ ५७

प्राप्ता गुणसंपदमाकृतिः॥ सुलभा रम्यता लोके दुर्लभं हि गुणार्जनं॥ ११॥ शरदंबुधरछाया

गत्वर्यो यौवनश्रियः॥ आपातरम्या विषयाः पर्यंतपरितापिनः॥ १२॥ अंतकः पर्यवस्थाता जन्मि

नः संततापदः॥ इति त्याज्ये भवे भव्यो मुक्तावुत्तिष्ठते जनः॥ १३॥ युग्मं॥ चित्तवानसि कल्या

णी यत्ते मतिरुपस्थिता॥ विरुद्धः केवलं वेषः संदेहयति मे मनः॥ १४॥ युयुत्सुनेव कवचं

किमामुक्तमिदं त्वया॥ तपस्विनो हि वसते केवलाजिनवल्कले॥ १५॥ प्रपित्सोः किं च ते मु

क्तिं निस्पृहस्य कलेवरे॥ महेषुधी धनुर्भीमं भूतानामनभिद्रुहः॥ १६॥ भयंकरः प्राणभृतां

मृत्योर्भुज इवापरः॥ असिस्तव तपस्थस्य न समर्थयते शमं॥ १७॥ युग्मं॥ जयमत्रभवान्नून

मरातिष्वभिलाषुकः॥ क्रोधलक्ष्म क्षमावंतः क्वायुधं क्व तपोधनाः॥ १८॥ यः करोति वधोदर्का

निःश्रेयसकरीः क्रियाः॥ ग्लानिदोषच्छिदः स्वच्छाः स मूढः पंकयत्यपः॥ १९॥ मूलं दोषस्य हिंसा

देरर्थकामौ स्म मा पुषः॥ तौ हि तत्त्वावबोधस्य दुरुच्छेदावुपप्लवौ॥ २०॥ अभिद्रोहेण भूतानां

माज्जयिनूगत्वरीश्रियः ॥ उरत्वान्निवसिंधूनामापदामतिपात्रतां ॥ २१ ॥ पागम्यासिस्सहायानांया
सुखेदोभयंयतः ॥ तासोकिंजन्मदुःखायविपदामिवसंपदां ॥ २२ ॥ दुरासदानरीनुयान्थ्येते
र्विश्वासजन्मनः ॥ भोगान्भोगानिवाहेयानध्यास्यापन्नदुर्लभा ॥ २३ ॥ नांतरज्ञांश्रियोजातुप्रिये
रासान्नभूयते ॥ आसक्तास्तास्वमीमूढावामशीलाहिजंतवः ॥ २४ ॥ कोपवादस्तुतिपदस्पर्शी, ५६
केषुपंचवोः ॥ साधुवृत्तानपिक्षुद्राविक्षिपंत्येवसंपदः ॥ २५ ॥ कृतवानन्यदेहेषुकर्त्ताचवि
धुरंमनः ॥ अप्रियेवविसंयोगोविप्रयोगःप्रियेसह ॥ २६ ॥ अन्यमाकीर्णतामेतिलुप्त्यव्य
स्नमुत्सवः ॥ विप्रलंभोपिभोक्तायसतिप्रियसमागमे ॥ २७ ॥ तदारम्याण्यरम्याणिप्रियाःश्रा

त्वंतदासवः ॥ तदेकाकीसबंधुस्सन्निःस्वेनरहितोयदा ॥ २८ ॥ पुंसःप्रभायासिहितादपतःपरितपासे
यदिनेष्टासनःपीअमासंजिभवताजने ॥ २९ ॥ कालापकं ॥ जन्मिनोस्यसिद्धितिंविद्वान्लक्ष्मी
मिवचलाचलां ॥ भवान्मास्मवधीन्न्यायंन्यायाधाराहिमादृशः ॥ ३० ॥ विज्ञहीहिरणाःसाहमा
तपःसाधुनीनशः ॥ उच्छेदजन्मनःकर्तुमेधिशांमस्तपोधन ॥ ३१ ॥ जीयंतांदुर्जयादेहे
पवःचक्षुरादयः ॥ अजितेषुननुलोकोयंतेषुकृत्स्नस्त्वयाजितः ॥ ३२ ॥ परवानर्थसंसिद्धौनीचवृ
त्तिरपत्रपः ॥ अविधेयेंद्रियःपुंसांगौरिवैतिविधेयतां ॥ ३३ ॥ श्वस्त्वयासुखसंपत्तिस्मरणीया
धुनातनी ॥ इतिस्वप्रोपमान्मत्वाकामान्मागास्तदंगतां ॥ ३४ ॥ श्रद्धेयाविप्रलब्धारःप्रि

याविप्रियकारिण॥ सुदुस्त्यजास्त्यजंतोपि कामाः कष्टा हि शात्रवः ॥३५॥ विविक्तेस्मिन्नगे
भूपः क्लाविलेज रुकं न्यया ॥ प्रत्यासीदति मुक्ति स्वां पुरामा भूरुदायुधः ॥३६॥ याह
त्यमरुता पत्याविति वाचमवास्थिते ॥ वचः प्रश्रययंगीरमथोवाच कपिध्वजः ॥३७॥
प्रसादरम्यमोजस्वि गरीयो लाघवान्वितं ॥ साकांक्षमनुपस्कारं विषग्गति निराकुलं ॥३८॥
न्यायनिर्णीतसारत्वान्निरपेक्षमिवागमे ॥ अप्रकंप्यतयान्येषामाम्नायवचनोपमं ॥३९॥
अलंघ्यत्वाज्जनैरन्यैः क्षुभितोदन्वदूर्जितं ॥ औदार्यादर्थसंपत्तेः शांतं चित्तमृषेरिव ॥४०॥
इदमीदृग्गुणोपेतं लब्धावसरसाधनं ॥ व्याकुर्यात्कः प्रियं वाक्यं को वा

...रायः ॥४९॥ अपाध
हृतोत्तरीयान्त्रस भंसभायामागतद्विषः ॥ मर्मच्छिदा नो वचसा निरतक्षन्नरातयः ॥५०॥ तामैक्ष
त्सपत्नेषु क्षद्ययाया गुरुसन्निधौ ॥ भावमानयने सस्याः सत्यंकारमिवांतकः ॥५१॥ अयथा
तत्क्षणं सभ्या दुःशासनपुरःसरां ॥ अभिसापार्कमाहत्तां छायामिव महातरोः ॥५२॥ स्थिस
र्धक्रियारंभैः प्रतिभिः किं लवेक्षितैः ॥ अरुध्येतामितीवास्यान यनेबाष्पवारिणा ॥५३॥
तितिक्षांतिमीरूणिस्खलान्याकुकितान्यपि ॥ तोयानि तोयराशीनां मनांसि च मनस्विनां ॥५४॥ सो
धातरिपुः सखीतिवैरमिसमास्वस्य तत्पंअसन्मैत्री हि दोषाय कुकच्छायेव सेविता ॥५५॥
दवान्नोदगात्मस्यां ज्यायानयगुणप्रियः ॥ सुलभो हि द्विषां भंगो दुर्लभा सत्स्ववाच्यता ॥५६॥ ५९

अपवादस्य सीतस्य समस्य गुणदोषयोः ॥ असद्वृत्तेरहो वृत्तं दुर्विभाव्यं विधेरिव ॥ ५६ ॥ ध्वंसे
तद्धृदयं सद्यः परिभूतस्य मे परैः ॥ यन्मर्षप्रतीकारं भुजालंबनं लंघयेत् ॥ ५७ ॥ अवध्याप्रि
भिर्नरिता हरिणैस्तुल्यवृत्तिनां ॥ अन्योन्यस्यापि जिह्मः किं पुनः सहवासिनां ॥ ५८ ॥ श
क्तिवैकल्यनम्रस्य निःसारत्वाल्लघीयसः ॥ जन्मिनो मानहीनस्य तृणस्य च समा गतिः ॥
५९ ॥ अलंघ्यं तत्तदुद्वीक्ष्य यद्यदुच्चैर्महीभृतः ॥ प्रियतां ज्यायसीं मा गान्महतां केन तुंगता ॥ ६०
६० ॥ तावदाश्रियते लक्ष्म्या तावदस्य स्थिरं यशः ॥ पुरुषस्तावदेवासौ यावन्मानान्न हीयते ॥ ६१ ॥ स पुमानर्थवज्जन्मा यस्य नाम्नि पुरःस्थिते ॥ नान्यामंगुलिमभ्येति संख्यायामुद्यतांगुलिः ॥ ६२ ॥

नीद्दगाचारः ॥ ५४ ॥ कालापकं ॥ न ज्ञानं तस्यास्य पौर्वापर्यमनुष्यते ॥ शासितुं येन मां धर्ममुनिभि
स्तुल्यमिच्छसि ॥ ५५ ॥ अविज्ञातप्रबंधस्य वचो वाचस्पतेरपि ॥ व्रजत्यफलतामेव नयद्रुह इवेहि
तं ॥ ५३ ॥ श्रेयसोऽप्यस्य ते तात वचसो नास्मि भाजनं ॥ नभसः स्फुटतारस्य रात्रेरिव विपर्ययः ॥ ५४ ॥
क्षत्रियस्तनयः पांडोरहं पार्थो धनंजयः ॥ स्थितः प्रास्तस्य दायादैर्भ्रातुर्ज्येष्ठस्य शासने ॥ ५५ ॥
कृष्णद्वैपायनादेशाद्बिभर्मि व्रतमीदृशं ॥ भृशमाराधने यत्तः स्वाराध्यस्य मरुत्वतः ॥ ५६ ॥ ५८
दुरक्षान्दीव्यता राज्ञा राज्यमात्मा वयं वधूः ॥ नीतानि पणतां नूनमीदृशी भवितव्यता ॥ ५७ ॥
तेनानुजसहायेन द्रौपद्या च मया विना ॥ भृशमायामियामासु यामिनीष्वभितप्यते ॥
५८ ॥

दुरासदवनज्यायान्वाम्यस्कंगोपिभृधरः॥ नजहातिमहोजस्कंमानप्रांशुमलंघ्यता ६३ गु
रूकुर्वंतुतेवेश्यानन्वर्थानैर्वसुंधरा॥ येषांयशांसिशुभ्राणिह्रेपयंतीदुमंडलं॥६४॥ उदाहरण
माद्रीभुप्रथमेतेमनस्विनां॥ रुषाशानिरिवामर्षयैन्नरातिषुपात्यते॥६५॥ नखुरवंप्रार्थयि
नार्थेषुहन्त्वदीविवंचकं॥ नोनिस्यताशानेरसस्यन्विविक्तंब्रह्मधाःपदं॥६६॥ प्रमार्ष्टुमयशः
ना। पंकमिच्छेयंच्छ्मनाकृतं॥ वैधव्यतापिमारातिवनितालोचनांबुभिः॥६७॥ युग्मं अपहास्येथवास ६९
क्रिप्रमादोवास्कमेधियः॥ अस्थानविहितायासःकामंजिह्मेतुवानवान्॥६८॥ वेशलक्ष्मीमनु
ध्यत्यसमुच्छेदनविद्विषां॥ निर्वाणमपिमन्येहमंतरायंजयश्रियः॥६९॥ आजन्मापुरुषस्तावद्गता

सुस्वणमेवदा॥ यावन्नेषुभिरादत्तेविलुसमरिभिर्यशः॥७०॥ अनिर्येभद्विषतांयस्यामर्षःप्रशाम्य
ति॥ पुरुषोक्तिःकथंतस्मिन्नुहितेहितपोधन॥७१॥ कलंपुरुषशाद्धेनज्ञातिमात्रोपकेविना॥ यांनीरू
तगुणेश्लाघ्यःसविस्मयमुदाहृतः॥७२॥ यस्मानमिवौजांसिसदसांगौरवेरितं॥ नामयस्याभिनं
दंतिद्विषोपिसपुमान्नपुमान्॥७३॥ यथाप्रतिज्ञंद्विषतांयुधिप्रतिचिकीर्षया॥ नामवान्येतिनृपतिस्त
ष्यन्निवजलौजसि॥७४॥ सर्वज्ञस्यावदातस्यशास्त्रांककस्यवलोकधर्मं॥ रूद्धेषुव्यर्थयायत्रभूय
तेनैर्नुनासूया॥७५॥ कथंवादीयतामर्वाक्श्रुतिताधर्मरोधिनी॥ आश्रमानुक्रमःपूर्वैस्मर्यते
नव्यतिक्रमः॥७६॥ आसक्ताहरियंरूढाजननीहूरगाचमे॥ तिरस्कारोतिस्वातंत्र्यंज्यायां

श्राचारवांश्रुतः ॥७७॥ स्वधर्ममनुरुंधंते नातिक्रममरातिभिः ॥ पलायंते कृते ध्वंसाना हवान्मानशा
लिनः ॥७८॥ विच्छिन्नाभ्रविलायं वा विलीयेन नगमूर्धनि ॥ आराध्य वा सहस्राक्षमयशःशल्यमु
द्धरे ॥७९॥ इत्युक्तवंतं परिरभ्य दोर्भ्यां तनूजमाविष्कृतदिव्यमूर्तिः ॥ अघोपघातं मघवा विभूत्यै
तस्मै भवाराधनमादिदेश ॥८०॥ हृष्टे पिनाकिनि मया सह लोकपालैर्लोकत्रयेपि विहिताप्र
तिवार्यवीर्यः ॥ लक्ष्मीं समुत्सुकयितासि भृशं परेषामुच्चार्य वाचमिति तेन तिरोबभूवे ॥८१॥ ९ ॥
॥ इति श्रीकिरातार्जुनीये महाकाव्ये लक्ष्म्यं भारविकविकृतौ इंद्रागमनो नामैकादशः सर्गः ॥
॥ ११ ॥ छ ॥ अथ वासवस्य वचनेन रुचिरवदनस्त्रिलोचनं ॥ क्लांतिरहितमभिराध

यितुं विधिवत्तपांसि विदधे धनंजयः ॥१॥ अभिरश्मिमालि विमलस्य धृतजयधृतेरनायुषः
तस्य भुवि बहुतिथास्तिथयः प्रतिजग्मुरेकचरणं निषीदतः ॥२॥ वपुरिंद्रियोपतपनेषु सततम्
असुखेषु पांडवः ॥ व्याप नगपतिरिव स्थिरतां महतां हि धैर्यमविचिंत्यवैभवं ॥३॥ नपपात
त. सन्निहिपंक्तिसुरभिषु फलेषु मानसं ॥ तस्य शुचिनि शिशिरे च पयस्यमृतायते हि सु
तपः सुकर्मणां ॥४॥ न विसिस्मिये न विषसाद मुहुरलसतां न चाददे ॥ सत्वमुरुधृतिर
जस्तमसी न हतस्म तस्य तस्य हतशक्तिकोमले ॥५॥ तपसा कृशं वपुरुवाह स विजित
जगत्रयोदयं ॥ त्रासजननमपि तत्वविदां न तदस्ति यन्न सुकरं मनस्विभिः ॥६॥ ज्वलतो

नकादनुनिशीथमधिकरुचिरं न सोमनिधेः ॥ धैर्यगुणमवजयन्विजयी ददृशे समुन्नत
तरः सशैलतः ॥ ७ ॥ अपतः सदाजपमुपांशु वदनमभितो विसारिभिः ॥ तस्य दशनकिरणैः
शुशुभे परिवेषभीषणमिवार्कमंडलं ॥ ८ ॥ कवचं स बिभ्रदुपवीतपदनिहितसज्यकार्मुकः ॥
शैलपतिरिव महेंद्रधनुःपरिवीतनीलगहनो विदिद्युते ॥ ९ ॥ प्रविवेश गामिव कृशस्य ६३
नियमसवनाय गच्छतः ॥ तस्य पदविनमितो हिमवान्गुरुतां नयंति हि गुणा न संहतिः ॥ १० ॥
परिकीर्णमुद्यतभुजस्य भुवनविवरे दुरासदं ॥ ज्योतिरुपरि शिरसो विततं जगृहे निजा
न्मुनिदिवौकसां पथः ॥ ११ ॥ रजनीषु राजतनयस्य बहुलसमयेपि धामभिः ॥ भिन्नति

मिरनिकरं न जहे शशिरश्मिसंगतयुजा नभःश्रिया ॥ १२ ॥ महतामयूखनिचयेन शमितरुचि जि
ष्णुजन्मना ॥ ह्रीतमिव नभसि वीतमलेन विराजते स्म वपुरंशुमालिना ॥ १३ ॥ तमुदीरितारु
णजटांशुमधिगुणशरासनं जनाः ॥ रुद्रमनुदितललाटदृशं ददृशुर्मिमंथिषुमिवासु
रीः पुरीः ॥ १४ ॥ मरुतां पतिः स्विदहिमांशुरथो पृथुशिखः शिखी तपः ॥ तप्तुमसुकरमुपक्रमते
न जनोयमित्यवयये स तापसैः ॥ १५ ॥ विनयं गुणा इव विवेकमपनयभिदं नया इव ॥ न्यायम
वधय इवाशरणाः शरणं ययुः शिवमथो महर्षयः ॥ १६ ॥ न दशाह भूरुहवनानि हरितनयधाम दूर
गं ॥ न स्म नयति परिशोषमपः सरुहं बहन्नपि न चासिकृततापसैः ॥ १७ ॥ परिवीतमंशुभिरुदस्तदिन
करमयूखमंडलैः ॥ शंभुमुपहतदृशः सहसा न च ते निरीक्षितुमभिप्रसेहिरे ॥ १८ ॥ अथ भूतन

व्यलवदीशामभिमुखयितुं कृतस्तवाः ॥ तत्रमौसिदद्भुतपुरुषं कमनीयविग्रहमयुग्मलोचनं ॥ १९ ॥ ककु
देवृषस्य कृतबाहुमकृशापरिणाहशालिनि ॥ स्पर्शसुखमनुभवंतमुमाकुचयुगममंडलइवार्द्र
चंदने ॥ २० ॥ स्थितमुन्नते तुहिनशैलशिरसि भुवनातिवर्त्तिना ॥ साद्रिजलधिजलवाहपथंस
दिगश्नुवानमिव विश्वमोजसा ॥ २१ ॥ अनुजानुमध्यमवसक्तविततवपुषा महाहिना ॥ लो ६४
कमखिलमिव भूमिभृता रवितेजसामवधिनाभिवेष्टितं ॥ २२ ॥ परिणाहिना तुहिनराशि
विशदमुपवीतसूत्रतां ॥ नीतमुरगमनुरंजयता शितिना गलेन विलसन्मरीचिना ॥ २३ ॥
वहुभिश्च बहुभिरहीनभुजगावळयैर्विराजितं ॥ चंदनतरुभिरिवालघुभिर्विलसितैर्मळ

सुमनामालती जातिः २

यमेदिनीभृतं ॥ २४ ॥ धृतमाळती(आधुरितं)सितकपाळकुंदमुपरुद्धमूर्द्धजं ॥ शेषमिव सुरसरित्पय
सांशिरसाविसारिशशिधाम बिभ्रतं ॥ २५ ॥ कुळकं ॥ मुनयस्ततोभिमुखमेत्य नयनविनि
वेशनोदिताः ॥ पांडुतनयतपसा जनितं जगतामशर्म भृशमाचचक्षिरे ॥ २६ ॥ तरसैव को
पि भुवनैकपुरुषपुरुषस्तपस्यति ॥ ज्योतिरमलवपुषोपरिवैरनिभूय धत्त इव भीमविग्रहः
२७ ॥ सधनुर्महेषुधिबिभर्त्ति कवचमसिमुन्नतं जटाः ॥ वल्कमजिनमतिचित्रमिदं मुनिताविरो
धि न च नास्य राजते ॥ २८ ॥ चलनेवनिश्चलति तस्य करणनियमे सदिङ्मुखं ॥ स्तंभमनुने निष्पकलं
यति शांतमरुद्ग्रहतारकागणयुतं नभस्तलं ॥ २९ ॥ स तदोजसा विजितसारममरदितिजो

...ःन. शीघ्रमेवलाभिष्यति२ नकिंचिद्विद्यः२

पसंहितं॥ विघ्नमिदमपि दधाति पुराकिमिवास्ति यन्न तस्य दुष्करं ३० विजिगीषते यदि ज
गंति युगपदथ संजिहीर्षति॥ प्राप्तुमभवमभिवांछति वा वयमस्य नो विषहितुं क्षमा रुचः ३१
किमुपेक्षसे कथय नाथ न तव विदितं न किंचन॥ त्रातुमलमभयदार्हसि नस्त्वयि मा स्म[illegible] ६५
शासति भवत्सराभवः॥ ३२॥ इति गां विधाय विरतेषु मुनिषु वचनं समाददे॥ भिन्नजलधि
जलनादगुरु ध्वनयन्दिशां विवरमंधकांतकः॥ ३३॥ बदरीतपोवननिवासनिरतमव
गांतम[illegible]॥ धातुरुदयनिधने जगतां नरमंशमादिपुरुषस्य गां गतं॥ ३४॥ द्विषतःपरा
[illegible] सिंधुरेषु सकलभुवनाभिभाविनः॥ क्रांतकुलिशकरवीर्यबलान्मदुपासमं विहितवा॥

न्यथा२ मनुष्यभावा नातर२

पुकर्तुः२

न्महत्तपः॥ ३५॥ अयमच्युतश्च वचनेन सरसिरुहजन्मनः प्रजाः॥ पातुमसुरनिधनेन विभुर्भुवमभ्यु
पेत्य मनुजेषु तिष्ठतः॥ ३६॥ सुरकृत्यमेतदवगम्य निपुणमिति मूकदानवः॥ हंतुमभिपतति पांडु
सुतं त्वरया तदत्र सह गम्यतां मया॥ ३७॥ विवरेपि नैनमविगूढमभिभवितुमेष पारयन्॥ पाप
निरतिरविशंकितया विजयं व्यवस्यति वराहमायया॥ ३८॥ निहते विडंबितकिरातनृपतिब
पुषारिपौ मया॥ मुक्तनिशितविशिखः प्रसभं मृगया विवादमयमाचरिष्यति॥ ३९॥ तपसानि
पीडितकृशस्य विरहितसहायसंपदः॥ सत्त्वविहितमतुलं भुजयोर्बलमस्य पश्यत मृधे
ऽधिकप्यतः॥ ४०॥ इति तानुदारमनुनीय विषमहरिचंदनालिना॥ घर्मजनितपुलके

बिंभ्रत्स

वर्कनाति विलसे[illegible]

...ननरुदाशाखिपिच्छलौछितकपोलभित्तिना २

नलसहजमौक्तिकावलिगुणेनवक्षसा ॥ ४१ ॥ वदनेनपुष्पितलतांतनियमितविलंबिमौलिना
४२ बृहदुद्वहन्जलदनादिधनुरुपहितैकमार्गणं । मेघनिचयइवसंवृतरुचिरःकिरातपृत
नापतिःशिवः ॥ ४३ ॥ विशेषकं ॥ अनुकूलमस्यचविचिंत्यगणपतिभिरात्तविग्रहैः ॥ शूलपरशु-
शरचापभृतैर्महतीवनेचरचमूर्विनिर्ममे ॥ ४४ ॥ विरचय्यकाननविभागमनुगिरिमहेश्व ६६
राज्ञया ॥ भीमनिनदपिहितोरुभुवःपरितोपदिश्यमृगयांप्रतस्थिरे ॥ ४५ ॥ क्षुभिता
भिनिस्सृतविभिन्नशकुनिमृगयूथनिस्वनैः ॥ पूर्णपृथुवनगुहाविवरःसहसाभयादिव
ररासभूधरः ॥ ४६ ॥ नविरोधिनीरुषमियायपथिमृगविहंगसंहतिः ॥ भ्रांतिसहजमपि

पुत्सैः २ भयंकरंप्रतिभयंइसमरः २

हरिभियःसममागताःसपदिवैरमापदः ॥ ४७ ॥ चमरीगणैर्गणबलस्यबलवतिभयेप्युपस्थिते ॥ वं
शविततिषुविषक्तपृथुप्रियबालवालधिभिराददेधृतिः ॥ ४८ ॥ हरसैनिकाःप्रतिभयेपिगजम
दसुगंधिकेसरैः ॥ स्वस्थमभिददृशिरेसहसाप्रतिबोधजृंभितमुखैर्मृगाधिपैः ॥ ४९ ॥ विभ
रांबभूवुरपवृत्तजठरशफरीकुलाकुलाःपंकविषमिततटाःसरितःकरिरुग्णचंदनरसा
रुणंपयः ॥ ५० ॥ महिषक्षतागरुतमालनलदसुरभिःसदागतिः ॥ व्यस्तशुकनिभशि
लाकुसुमःप्रणुदन्ववौवनसदांपरिश्रमं ॥ ५१ ॥ मथितांभसोरयविकीर्णमृदितक
दलीगवेधुकाः ॥ क्लांतजलरुह[illegible]लाःसरसीर्विदधेनिदाघइवसत्वसंप्लवः ॥ ५२

वायुर्मातरिश्वासदागतिः ३

दुःन. ...ननरूर्दशस्विपिछलौ ॥२

इतिचाळय ...वळसानुवनगहनाजानुमापतिः प्रापमुदितहरिणीदशनक्षतवीरुधंवस
तिमिंद्रसूनवी ॥५३॥ सस्समासससादघननीळमभिमुखमवस्थितंमुनेः ॥ शोत्रनिकषणविभिन्न
भुवंदनुजंदधानम्...सोकरंपुंवे ॥५४॥ कश्चांतेसुरसरितोनिधायसेनामन्वीतःकतिपयैःकि
रातवर्यैः ॥ प्रच्छन्नस्तरुगहनैःसगुल्मजाळैःलक्ष्मीवान्ननुपदमस्यसंप्रतस्थे ॥५५॥
॥ ॥ इतिश्री किरातार्जुनीयेमहाकाव्येलक्ष्म्यंकेमारविकविकृतौकिराताभिगमनंनाम ६०॥
द्वादशःसर्गः ॥१२॥ ॥छ॥ ॥ वपुषापरमेणभूधराणामथसंभाव्यपराक्रमंविभेदे ॥
मृगमाशुविलोकयांचकारस्थिरदंष्ट्रोग्रमुखंमहेंद्रसूनुः ॥१॥ स्फुरदुग्रसटोन्नतिःसदूरादभि
धावन्नवधीरितान्यकृत्यः जयमिच्छतितस्यजातशंकेमनसीमंमुहुराददेवितर्कं ॥२॥

प्रकटं

सत्वान्यकामी

मगयशौकुरंगेच...योरितिविश्वः २

२ आकोभुजंगमेक्रूरेश्वापदेदुष्टदंतिनि इतिविश्वः २

अभिधावति

तपःसामर्थ्यभंगरूपा ३

समाकानमिवान्निव २

निविडमुखेन
घनपोत्रविकीर्णशालमूलोनिबिडस्कंधनिकाषरुग्णवप्रः ॥ अयमेकचरोभिवर्ततेमांसमरा
पेवसमाकुरुषमाणः ॥३॥ इहवीतभयास्तपोनुभावाज्जहतिव्याळमृगाःपरेषुवृत्तिं ॥ मयितां अन्यांतरे
सुतरामसौविधत्तेविकृतिःकिंनुभवेदियंनुमाया ॥४॥ अथवैषकृतज्ञयेवपूर्वंभृशमासेवि
अनिर्मर्ष्या तयारुपानमुक्तः ॥ अदवधूयविरोधिनीःकिमारान्मृगजातीरभियातिमांजवेन ॥५॥ नम्र
गःखलुकोप्ययंजिघांसुःस्खलतिश्चत्रतथाभृशंमनोमे ॥ विमलंकलुषीभवच्चचेतःकथय
त्येवहितैषिणंरिपुंवा ॥६॥ मुनिरस्मिनिरागसःकुतोमेभयमित्येषनभूतयेभिमानः ॥ पर
वृद्धिषुबद्धमत्सराणांकिमिवस्यस्तिदुरात्मनामलंघ्यं ॥७॥ दनुजःस्विदयंक्षपाचरोवा

…तनन कस्य … (marginal gloss, partly lost) — गात्रयोः … बंधुस्वस्वजनास्समाः ४

वनजेनेति बोधवतास्ति सख्ये ॥ अभिभूय तथा हिमैर्नीलः सकलं कंपयतीव शैलराजं ॥ अयमेव मृ
गव्यसत्रकामः प्रहरिष्यन्मयि मायया शमस्थे ॥ पृथुभिर्ध्वजिनीरवैरकार्षीच्चकितोद्भ्रांत
मृगाणि काननानि ॥ ९ ॥ बहुशः कृतसत्कृतेर्विधातुं प्रियमिच्छन्नथवा सुयोधनस्य ॥
क्षुभितं वनगोचराभियोगाद्गणमाशिश्रियदाकुलं तिरश्चां ॥ १० ॥ अवलीढसनाभिरं
श्वसेनः प्रसभं खांडवजातवेदसा वा ॥ प्रतिकर्तुमुपागतः समन्युः कृतवैरोऽथवा वृको
दरेण ॥ ११ ॥ बकशाकिनया यथा तथा वा धियमुच्छेदपरामयं दधानः ॥ निधनेन मया
निबर्हणीयः परमं लाभमरातिभंगमाहुः ॥ १२ ॥ कुरुतान्न तपांसि मार्गदायी विजया

रक्षान्वेषणां प्रवेशो अयपक्ष…

अनुभावः प्रभावे … निश्चये ३ … एकत्र … वीर्य … ॥ … स्वबलं … तस्य …
नम्रतां आनुकूल्यं च ४ … उपजापे … च
दृढं मन्युरूपं २ … रहितं ३

येत्यलमन्वशान्मुनिर्मां ॥ बलिनश्च वधादृतेऽस्य शक्यं व्रतसंरक्षणमन्यथा न कर्तुं ॥ १३ ॥ इति
तेन विचिंत्य चापनाम प्रथमं पौरुषचिह्नमाललंबे ॥ उपलब्धगुणः परस्य भेदे सचिवः शुद्ध इवा
ददे च बाणः ॥ १४ ॥ अनुभाववता गुरु स्थिरत्वादविसंवादि धनुर्धनंजयेन ॥ स्वबलव्यसने
पिपीड्यमानं गुणवन्मित्रमिवानतिं प्रपेदे ॥ १५ ॥ प्रविकर्षनिनादभिन्नरंध्रः पदविष्टंभनि
पीडितस्तदानीं ॥ अधिरोहति गांडिवं महेषौ सकलः संशयमारुरोह शैलः ॥ १६ ॥ दद
शेऽथ सविस्मयं शिवेन स्थिरपूर्णायतचापमंडलस्थः ॥ रचितस्त्रिसुराणां पुरां विधातुं वधमा
… भयानकः परेषां ॥ १७ ॥ विचकर्ष च संहितेषुरुच्चैश्चरणास्कंदननामिताचलेंद्रः ॥ धनु

पीडितः

… नपुंसके ३

अर्जुनस्य तु … गांडीवं …

(left margin glosses: चितवर्ष …; … अन्यत्र … ; … पाना …)
(right margin: सपिंडा … ; ६८)

पिनाकोऽजगवं धनुः ३

रा[illegible]मोग[illegible]सुकिज्यावदनग्रंथिविमुक्तवह्निरंशुः ॥ १८ ॥ सभवस्य भवक्षयैकहेतोः सितसप्ते

र्विधास्यतोः सहार्थी ॥ रिपुराप पराभवाय मध्यं प्रकृतिप्रत्यययोरिवानुबंधः ॥ १९ ॥ अथदीपि

तवारिवाहवर्त्मा रववित्रासितवारणादवार्यः ॥ निपपात जवादिषुः पिनाकान्महतोभ्रादिव वै ईसंज्ञकोऽय

द्युतिःकृशानुः ॥ २० ॥ व्रजतोस्य बृहत्पतत्रजन्माकृततार्क्ष्योपनिपातवेगशंकः ॥ प्रतिनादम ६९

हान्महोरगाणां हृदयश्रोत्रभिदुत्पपात नादः ॥ २१ ॥ नयनादिव शूलिनः प्रवृत्तैर्मनसोप्याशु

रतितियन् ३ तरं यतः पिशंगैः ॥ विदधे विलसत्तडिल्लताभैः किरणैर्व्योमनि मार्गणस्य मार्गः ॥ २२ ॥ अपय

न्धनुषः शिवांतिकस्थैर्विवरे सद्भिरभिख्यया जिहानः ॥ युगपद्ददृशे विशन्वराहं तदुपोढैश्च

नभश्चरैः पृषत्कः ॥ २३ ॥ अलीके अंतरे २ गच्छन् तपसा सनैः २

दिव्यास्त्राधिष्ठानेन महत्त्व ३

सतमाकनिकेत्यो सुराणां घननीहार इवाविषह्यवेगः ॥ भयविप्लुतमीक्षितो वनस्थैर्जगतीग्राह इवा

पगां जगाहे ॥ २४ ॥ सपदि प्रियरूपपर्वलेखः शितलोहाग्रमुखः खमाससाद ॥ कुपितांतकतर्जनां

गुलिश्रीर्व्यथयन्प्राणभृतः कपिध्वजेषु ॥ परमास्त्रपरिग्रहोरुतेजः स्फुरदुल्काकृतिविक्षिप

न्वनेषु सजवेन पतन्परः शराणां नोपततां व्रात इवारवं वितेने ॥ २६ ॥ अविभावितनिष्क्रमप्र अतुलक्ष्य इति शेषः

याणः शमितायाम इवातिरंहसा सः ॥ सहपूर्वतरं नु चित्तवृत्तेरपतित्वा नु चकार लक्ष्यभे प्रबभूव २

दं ॥ २७ ॥ सवृषध्वजसायकावभिन्नं जयहेतुः प्रतिकायमेषणीयं ॥ लघु साधयितुं शरः प्रसे

हे विधिनेवार्थमुदीरितं प्रयत्नः ॥ २८ ॥ अविवेकवृथाश्रमाविवार्थं क्षयलोभाविव संश्रिता

प्रेरितं बहुमिरोषाः २

~ तमोऽधकारे स्वर्भानुस्तमः शोके गुणांतरे

अनवधानता ~

नु...णां ॥ विवि...नां पुमिवानयप्रमादावसादं विशिखो विनिन्य तुस्तौ ॥ २९ ॥ अथ दीर्घतमं तमः प्रवे

मरिष्यमिस० क्ष्य न सहसा न्नरयः ससंभ्रमेण ॥ निपतंतमिवोष्णरश्मिमुर्व्यां वलयीभूततरुं धरां च मेने

३० ॥ स गतः क्षितिमुष्णशोणितार्द्रः खुरदंष्ट्राग्रनिपातदारिताश्मा ॥ असुभिः क्षणमीक्षितें

द्रस्तनुर्विहितामर्षगुरुध्वनिर्निरासे ॥ ३१ ॥ स्फुटपौरुषमापपात पार्थस्तमथ प्राज्यशरः श ६०

रं जिघृक्षुः ॥ न तथा कृतवेदिनां करिष्यन्प्रियतामेति यथा कृतावदानः ॥ ३२ ॥ उपकार इवास

अदर्शनं

ति प्रयुक्तः स्थितिमप्राप्य मृगे गतः प्रणाशं ॥ कृतशक्तिरधोमुखो गुरुत्वाज्जनितव्रीड इवा

त्मपौरुषेण ॥ ३३ ॥ स समुद्धरता विचिंत्य तेन स्वरुचं कीर्तिमिवोत्तमां दधानः ॥ अनुयुक्त इ

अवदानं कर्मवृत्त

अवदा

वार्त्तापाटवमोरे ...समनामयं ०

स्ववर्त्मनुषे रविरिन्दुनृशं विलोचनाभ्यां ॥ ३४ ॥ युग्मं ॥ तव कार्मुकधरं महारथः पश्यति स्म स

वनेचरं ॥ सन्निकाशयितुमग्रतः स्थितं शासनं मकरकेतुविद्विषः ॥ ३५ ॥ स प्रयुज्य तनये महीपते

रात्मजातिसदृशीं किलानतिं ॥ सांत्वपूर्वमभिनीतिहेतुकं वक्तुमित्थमुपचक्रमे वचः ॥ ३६

शांततावितनयोगिमानसं भूरिधामविमलं तपःश्रुतं ॥ प्राह ते नु सदृशी दिवौकसा ६१

मन्ववायमवदातमाकृतिः ॥ ३७ ॥ दीपितस्त्वमनुभावसंपदा गौरवेण लघयन्महीभृतः ॥ महत्तया

राजसे मुनिरपीह धारयन्नाधिपत्यमिव शातमन्यवं ॥ ३८ ॥ तापसोपि विभुतामुपे

यिवानास्पदं त्वमसि सर्वसंपदां ॥ दृश्यते हि भवतो विना जनैरन्वितस्य सचिवैरिव द्युतिः

इङ्गितैरा० ३९

प्राद्यपाधि

तृष्मानः

॥ स

विस्मयः किमिव वाजयंत्र्यिया नैव मुक्तिरपि ते दवीयसी ॥ ईप्सितस्य न भवेदुपाश्रयः कस्य नि
र्जितरजस्तमोगुण ॥४०॥ हृपयन् हिमतेजसं विपासुरमिव मुपेत्यपौरुषः ॥ हर्तुमि
हसि वराह तेदिनं नैनमस्मदधिपस्य सायकं ॥४१॥ स्मर्यते नु मृतां सनातनं न्यायमावरणमु
नमिन्द्रजिः ॥ ध्वंसते यदि न वाहदृशास्ततः कः प्रयातु वदते न वर्त्मना ॥४२॥ आकुमारमुपदेष्टुमिह
वः सन्ति हन्ति मपथान्महापदः ॥ योगशक्तिजितजन्ममृत्यवः शीलयंति यतयः सुशीलतां
४३॥ तिष्ठतां तपसि पुण्यमासजन्संपदोनुगुणयन्सुखैषिणां ॥ योगिनां परिणमन्विमुक्तये
केन नास्तु विनयः सतां प्रियः ॥४४॥ नन्नमत्र भवतः शराकृतिं सर्वथायमनुयाति सायकः ॥ सो
ऽयमित्यनुपपन्नसंशयः कारितस्त्वमपदे पदं यथा ॥४५॥ अन्यदीयविशिखेन केवलं निःस्पृहे

सोयमिति निश्चारेव उपा... ते इति शेषः

ण भवितव्यमाहते ॥ निघ्नतः परनिबर्हितं मृगं व्रीडितव्यमपि ते सचेतसः ॥४६॥ संततं निशमयंत
उत्सुका यैः प्रयांति मुदमस्य सूरयः ॥ कीर्तितानि हसितेपि तानि तं व्रीडयंति चरितानि मानिनं
॥४७॥ अन्यदोषमिव सः स्वकं गुणं ख्यापयेत्कथमधृष्टताजडः ॥ उच्यते स खलु कार्यवत्तया धि
ग्विभिन्नबुधसेतुमर्थितां ॥४८॥ युग्मं ॥ दुर्वचं तदथ मास्म भून्मृगस्त्वय्यसौ यदकरिष्यदोज
सा ॥ नैनमाशु यदि वाहिनीपतिः प्रत्यपत्स्यत शितेन पत्रिणा ॥४९॥ कोन्विमं हरितुरंगमायुध
स्थेयसीं दधतमंगसंहतिं ॥ वेगवत्तरमृते चमूपतेर्हंतुमर्हति शरेण दंष्ट्रिणं ॥५०॥ मित्रमिष्टमुप
कारि संशये मेदिनीपतिरयं तथा च मे ॥ तं विरोध्य भवता निरासि मा सज्जनैकवसतिः कृतज्ञ
ता ॥५१॥ प्राप्नुवंत्युपचयं पथाखिला रक्षितारमसुरक्ष्यसंपदः ॥ विद्विषः खलु तथा जिगीषतां

ते

८२

मित्रलाभहीनेत्यर्थः

रक्षितुमशक्यमहिमानः

मित्रलाभमनुलाभसंपदः ॥५२॥ लभ्यमेकसुकृतेन दुर्लभा रक्षितारमसुरक्ष्यभूतयः ॥ स्वंतमंतवि
रसा जिगीषतां मित्रलाभमनु लाभसंपदः ॥५३॥ पाठांतरं ॥ चंचलं वसु नितांतमुन्नता मेदिनीमप
हरंत्यरातयः ॥ भूधरस्थिरमुपेय मागतं मावमंस्त सुहृदं नृपं भवान् ॥५४॥ जेतुमेव भवता तप
स्यते नायुधानि दधते मुमुक्षवः । प्राप्यते च सकलं महीभृता संगतेन तपसः फलं त्वया ॥५५॥ वा
जिभूमिरिभराजकाननं संति रत्ननिधयश्च भूरयः ॥ कांचनेन किमिवास्य पत्रिणा केव
लं न सहते विलंघनं ॥५६॥ न नदीयविनिशिखवा तिसर्जना दृस्तकुवां गुरुपदं दृष्टयामिति ग
चव प्लवगराजपोऽखिल प्रेमपूर्वकमितरेतराश्रयं ॥५७॥ नाभियोक्तुमनृतं त्वमिष्यसे क
स्तपस्विविशिखेषु चादरः ॥ संति भूभृति शरा हि नः परे ये पराक्रमवसूनि वज्रिणः ॥५८॥
स्सावलेपमुप[illegible] रक्षिते परैरभ्युपैति विकृतिं रजस्यपि । अर्थितश्च न महान्समीहते जीवितं धनयितुं किमु श्रियं ५९

देवादागतं

नदृष्टासि

३

मार्गणैरथतवप्रयोजनंनाथसेकिमुपतिंनभूभृतः॥त्वद्विधंसुहृदमेत्यसोर्थिनंकिन्न
यच्छतिविजित्यमेदिनीं॥५९॥तेनसूरिरुपकारिताधनःकर्तुमिच्छतिमयाचितं न
वृथा॥सीदतामनुभवन्निवार्थिनांवेदयत्प्रणयभंगवेदनां॥६०॥शक्तिरर्थपतिषुस्व
यंग्रहंप्रेमकारयतिवानिरत्ययं॥कारणद्वयमिदंनिरस्यतःप्रार्थनाधिकबलेविलंबना ७३
६१॥अस्त्रवेदमधिगम्यतत्त्वतःकस्यचेहभुजवीर्यशालिनः॥जामदग्न्यमपहायगीय
तेतापसेषुचरितार्थमायुधं॥६२॥अभ्यघानिमुनिचापलात्त्वयायन्मृगःक्षितिप
तेःपरिग्रहः॥अक्षमिष्टतदयंप्रमाद्यतांसंवृणोतिखलुदोषमज्ञता॥६३॥जन्मवेषतपसां

सांप्रतं णी
विरोधिनींमाकृथाःपुनरपक्रियामसौ॥आपदेत्युभयलोकदूषिणीवर्तमानमपथेहिदुर्मतिं
६४॥यष्टुमिच्छसिपितॄन्नभक्तितोनत्वमर्चयिषुर्दिवौकसः॥दातुमेवपदवीमसिक्षमः
किंमृगेंगविशिखंन्यवीविशः॥६५॥सज्जनोसिविजहीहिचापलंसर्वदाकइववासहि
ष्यते॥वारिधीनिवयुगांतवायवःक्षोभयंत्यनिभृतागुरूनपि॥६६॥अस्त्रवेदविदयं
महीपतिःपार्वतीयइतिमावजीगणः॥गोपितुंभुवमिमांमरुत्वताशैलवासमनुनीयलं
भितः॥६७॥तत्तितीक्षितमिदंमयामुनेरित्यवोचतवचश्चभूपतिः॥बाणमत्रभवतोदिशन्नि
जंप्राप्नुहित्वमपिसर्वसंपदः॥६८॥आत्मनीनमुपतिष्ठतेगुणाःसंभवंतिविरमंतिचापदः॥

वनतेइत्रोषः ०

इत्यनेकविधिमाजिमास्मभूदर्थिताकथमिवार्यसंगतौ ॥ ६९ ॥ पश्यतामयमनोकहांतरेतिग्महेति
पृतनाभिरन्वितः ॥ साहिवीचिरिवसिंधुरुद्धतो भूपतिस्समयसेतुवारितः ॥ ७० ॥ स
ज्यंधनुर्वहतियोहिपतिःस्थवीयस्थेयान्जयन्हरितुरंगमकेतुलक्ष्मीं ॥ अस्यानु ७४
कूळयमतिंमतिमन्ननेनसख्यासुखान्यधिगमिष्यसिचिंतितानि ॥ ७१ ॥ इतिश्री
किरातार्जुनीयेमहाकाव्येलक्ष्म्यंकेभारविकविकृतौदूताभिगमनोनामत्रयोदशः
सर्गः ॥ १३ ॥ छ ॥ ६ ॥ ६ ॥ श्रीः ॥ ॥ ततःकिरातस्यवचोभिरुद्धतैःपराहतःशैलइवा
र्णवांबुभिः ॥ जहौनधैर्यंकुपितोपिपांडवःसुदुर्ग्रहांतःकरणाहिस[illegible]यः ॥ १ ॥